C

'Ασπ
ἐ
αὐτ

97

97

C

'Ασπ

ἐ

αὐτὸ

ε

ॐ

VIKRAMARKA CHARITRA,

A

PROSE WORK IN SANSKRIT

FOR

The use of the IVth & the Vth Forms

EDITED

BY

S. VENKATARAMA SASTRI,

Sanskrit Pandit,

Town High School, Kumbakonam.

PRINTED AT THE "SRI VIDYA PRESS,"

KUMBAKONAM.

Price 10 Annas.] **1905** *[Postage Extra.*

PREFACE.

It is a curious fact that the Sanskrit Literature, the most extensive in its range, is remarkably deficient in standard prose classics. The so-called standard prose works now extant —Kadambari, Harsha Charita etc.—are too high and heavy for the boys in the Lower forms of the High Schools. The Hitopadesa and the Panchatantra combine in themselves simple prose and poetry, but require thorough and careful revision before they are put into the hands of the students of the IVth and the Vth Forms, as they abound in mistakes of grammar and construction.

I have chosen the present work as suitable to those forms, as supplying attractive and interesting matter to young boys as cotaining prose and poetry in itself; and as being simple; in style, clear and correct. I have omitted some stanzas in lengthy metres that are not necessary for the context. I have only to mention one irreconcilable contradiction in the story itself. In the introduction, Vikramarka is said to have been defeated by Salivahana and to have died from the wounds in battle; but in the story told by the 24th *Salabhanjika* he is said to have returned to Ujjain after having failed in his attempts to revive his dead hosts.

It would give me great pleasure to know that the book finds favour with the students in the High Schools and the teachers of Sanskrit therein.

KUMBAKONAM,
22—1—1905.

EDITOR.

'Ασπ
ἔ
αὐτ

श्रीरस्तु ।

विक्रमार्कचरित्रम् ।

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥ १ ॥

अस्ति किल मालवे समस्तवस्तुसंपूर्णा स्वगुणपराभूतपुरन्दरपुरविभूतिरुज्जयिनी नाम नगरी । तत्र समस्तसामन्तसीमन्तिनीसीमन्तसिन्दूरारुणचरणकमलयुगलो भर्तृहरिर्नाम राजासीत् । स च सकलकलाप्रवीणः समस्तशास्त्राभिज्ञश्च । तस्य च राज्ञः स्वविक्रमापहृतवैरिविक्रमो विक्रमो नामानुजोऽभूत् । तत्र च नगरे सकलशास्त्राभिज्ञः समस्तमन्त्रशास्त्रप्रवीणश्च ब्राह्मणः कश्चिदवर्तत । स केवलं दरिद्रः । स चैकदा मन्त्रानुष्ठानेन भुवनेश्वरीमतोषयत् । सा तु सन्तुष्टा ब्राह्मणमाह— 'भो ब्राह्मण फलमेतद्भक्षय । अनेन जरामरणवर्जितो भविष्यसि' इति । ब्राह्मणस्तु तत्फलं गृहीत्वा स्वभवनमागत्य स्नात्वा देवतार्चनां विधाय यावत्फलं भक्षयितुमयतिष्ट तावदस्य मनस्येवं बुद्धिरुदभूत्—'अहं तावद्दरिद्रः । जरामरणवर्जितो भूत्वा कस्योपकारं करिष्यामि । बहुकालजीविनोऽपि मम भिक्षाटनेनैव जीवनं कार्यम् । परोपकारिणस्तु पुरुषस्य स्वल्पकालजीवनमपि श्रेयो भवति । तथा चोक्तम्—

यस्मिन्जीवति जीवन्ति बहवः स तु जीवतु ।
बकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥ २ ॥ इति' ।

एवमादि विचार्य 'एतत्फलं राज्ञे दद्याम् । स जरामरणवर्जितो भूत्वा चातुर्वर्ण्यं धर्मतः सविशेषं पालयेत्' इति निश्चित्य तत्फलं गृहीत्वा राजसमीपमागत्य—

अहीनमालिकां बिभ्रत्तथा पीताम्बरं वपुः ।
हरो हरिश्च भूपाल करोतु तव मङ्गलम् ॥ ३ ॥

इत्याशिषं प्रयुज्य फलं दत्त्वा भणति स्म— 'भो राजन्देवतावरप्रसादलब्धमिदमपूर्वं फलं भक्षय । अनेन त्वं जरामरणवर्जितो भविष्यसि' इति । राजा तु तत्फलं गृहीत्वा ब्राह्मणं संमान्य गृहं संप्रेष्य विचारयति स्म— 'अहो ममैतत्फलभक्षणादमरत्वं भविष्यति । मम त्वनङ्गसेनायां महती प्रीतिरस्ति । सा मयि जीवति म्रियेत चेत्तस्या वियोगदुःखं सोढुं न शक्नोमि । तस्मादिदं फलं मम प्राणप्रियाया अनङ्गसेनायै दास्यामि' इति । ततस्तामाहूय तस्यै ददौ । तस्या मन्दुरिकः कश्चित्प्रियतमः । सा पुनर्विचार्य तस्मै तत्फलं ददौ । तस्य काचिद्दासी प्रियतमा । स पर्यालोच्य तस्यै प्रादात् । सा तु प्रियतमाय कस्मै चिद्गोपालाय तत्प्रायच्छत् । तस्यापि कस्यां चिद्गोमयधारिण्यां महत्प्रेमाभूत् । स पुनर्विचार्य तत्फलं तस्यै दत्तवान् । ततः सा गोमयधारिणी ग्रामाद्बहिर्गोमयं हृत्वा तद्भाजनं शिरसि निधाय तदुपरि तत्फलं निक्षिप्य राजवीथीमाजगाम । तदा राजा भर्तृहरी राजकुमारैः सह बहिर्गच्छंस्तस्याः शिरःस्थापितगोमयाप्रस्थितं फलं दृष्ट्वा गृहमागत्य ब्राह्मणमाहूय 'भो ब्राह्मण भवता यत्फलं दत्तं तादृशमन्यत्किमस्ति?' इत्यपृच्छत् । ब्राह्मणस्तु 'भो राजंस्तत्फलं देवताप्रसादलब्धम् । तादृशं फलं भूलोके नास्ति । सत्यमेतत् । राजा नाम साक्षादीश्वरः । तस्य पुरतोऽनृतं न वक्तव्यम् । स देववन्निरीक्षणीयः । तथा चोक्तम्—

सर्वदेवमयो राजा ऋषिभिः परिकीर्तितः ।
तस्मात्तं देववत्पश्येन्न व्यलीकं वदेत्सुधीः ॥ ४ ॥ इति' ।

इति प्रत्यवदत् । राजा 'तादृशं फलमिदानीमेव दृष्टं राजवीथ्याम्' इत्याह । ब्राह्मणो 'मया दत्तं फलं भक्षितं वा न वा?' इत्यपृच्छत् । राजा 'नाहमभक्षयम् । किं तु मम प्राणप्रियाया अनङ्गसेनायै प्रादाम्' इति प्राह । 'तर्हि तामाहूय पृच्छ' इति ब्राह्मणो जगाद । ततो राजा तामाहूय सशपथमपृच्छत् । सा 'मया तत्फलं मन्दुरिकाय दत्तम्' इति बभाण । स त्वाकारितो 'दास्यै

दत्तम्' इत्यकथयत् । दासी 'गोपालाय' इति, गोपालो 'गोमयधारिण्यै' इति चाकथयताम् । ततो जातसंप्रत्ययो राजा परमं विषादं गत्वा ससम्भ्रमं गोमयधारिणीमाकार्य तत्फलं गृहीत्वा कतिचिच्छ्लोकानपाठीत् —

रूपे मनोहारिणि यौवने च वृथैव पुंसामभिमानबुद्धिः ।
नतभ्रुवां चेतसि चित्तजन्मा कर्तुं यदेवेच्छति तत्करोति ॥५॥
स्मरोपममपि प्राप्य वाञ्छन्ति पुरुषान्तरम् ।
नार्यः सर्वाः स्वभावेन नोच्यन्ते विमलाशयाः ॥ ६ ॥
हीनभाग्यस्य राज्यश्रीः पुष्पश्रीर्गगनस्य वा ।
भवेदेव न तु स्त्रीणां मनःशुद्धिर्मनागपि ॥ ७ ॥
अतः, न वैराग्यात्परं भाग्यं न बोधादपरं सुखम् ।
न हरेरपरस्त्राता न संसारात्परो रिपुः ॥ ८ ॥ इति ।

एवं पठित्वा परं विरक्तो भर्तृहरिर्विक्रमार्कं राज्येऽभिषिच्य तत्फलं तस्मै दत्त्वा स्वयं वनं जगाम । ततः प्राप्तराज्यो विक्रमः सकलामपि वसुन्धरां न्यायेन पर्यपालयत् । तत एकदा दिगम्बरः कश्चिद्राजसमीपमागत्य —

लीलया मण्डलीकृत्य भुजङ्गान्धारयन्हरः ।
दद्याद्देवो वराहश्च तुभ्यमभ्यधिकां श्रियम् ॥ ९ ॥

इत्याशिषं प्रयुज्य राजहस्ते फलं दत्त्वाब्रवीत् — 'भो राजन्नहं कृष्णचतुर्दश्यां महाश्मशानेऽघोरमन्त्रेण हवनं करिष्यामि । तत्त्वयोत्तरसाधकेन भवितव्यम्' इति । राजापि तथेति प्रतिज्ञाय तेन सह पितृवनं प्राविशत् । तत्र दिगम्बरो नृपं हन्तुमारभ्य तेन स्वयमेव हतः । तेन प्रसङ्गेन तस्य राज्ञो वेतालो वशंवदो बभूव । अष्ट महासिद्धयश्च प्राप्ताः । ततस्त्रिभुवनेऽस्य कीर्तिरनर्गला गङ्गेव बभूव । अत्रान्तरे सुरनगरे रम्भोर्वश्योर्नर्तननैपुणे विवादः समजायत । तयोरन्तरमवगन्तुममरेषु कोऽपि न शशाक । एकदा सिंहासनासीनं देवं वासवं नारदो बभाण— 'देव धरातले विक्रमो नाम राजा अस्ति । स सकलकलाभिज्ञः । विशेषतः सङ्गीतविद्याविचक्षणः । स एवैतयोर्विवादनिर्णयं कर्तुं प्रभवेत्' इति । तच्छ्रुत्वा महेन्द्रो विक्रममानेतुं मा-

तलिं प्रेषयामास । विक्रमोऽपि मातलिसमानीतं रथमारुह्य सहैव वेतालेन सुधर्मां प्रविश्य वासवेन संमानितः समुचितमासनमध्यास्त । तदानीं रम्भोर्वश्योर्नृत्तं प्रावर्तत । राजा तूर्वशीं प्रशशंस । नृत्तशास्त्ररहस्यान्युपन्यस्य जयमुर्वश्यै प्रादाच्च । पाकशासनस्तु परं संतुष्य मणिमयमतिमनोहरं सिंहासनमेकमस्मै प्रादात् । तस्मिन्सिंहासने द्वात्रिंशत्सालभञ्जिकाः सन्ति । तासां शिरसि पदं निधाय तदध्यासितव्यम् । राजा तु महेन्द्रमापृच्छ्य तदासनं गृहीत्वा निजं नगरमगमत् । तदनन्तरमेकदा शुभे मुहूर्ते विक्रमार्को ब्राह्मणाशीर्वादपूर्वकं तत्सिंहासनमारुह्य राज्यमकरोत् । एवं महान्कालो गतः । तत एकदा प्रतिष्ठानगरे कस्यांचित्कन्यकायां शालीवाहनो नाम समजायत । तदानीमुज्जयिन्यां परितो भूकम्पधूमकेतुदिग्दाहादीनि दुर्निमित्तानि दृष्टानि । ततो विक्रमादित्यो दैवज्ञानाहूय भूकम्पादिफलं पप्रच्छ । दैवज्ञा ऊचुः—'भो देव यदयं भूकम्पः सन्ध्याकाले जातस्ततो राज्ञोऽनिष्टं सूचयति । तथा च नारदीये—

अनिष्टदः क्षितीशानां भूकम्पः सन्ध्ययोर्द्वयोः ।
राज्ञां विनाशपिशुनो धूमकेतुरुदाहृतः ॥ १० ॥ इति' ।

तदाकर्ण्य राजाब्रवीत्—'भो दैवज्ञाः पुरा परमेश्वरः सन्तोषितो मामाह । 'भो राजन्प्रसन्नोऽस्मि । विनामरत्वं याचस्व' इति । ततोऽहमवोचम्—'सार्धद्विहायनायां कन्यायामुत्पन्नात्पुत्रान्मम मरणं भवतु' इति । तच्छ्रुत्वा देवस्तथेत्यनुजग्राह' इति । तच्छ्रुत्वा 'तर्हि तादृशः पुत्रो भविष्यति' इति दैवज्ञैरप्युक्तम् । राजापि 'हा दैवसृष्टिरचिन्त्या । तादृशः कस्मिन्देशे कथमुत्पन्नो भविष्यति' इति व्याकुलितचित्तो वेतालमाहूयैतत्सर्वं तस्मै निवेद्याब्रवीत्—'भो यक्ष पृथिवीं परिभ्रम । एवंविधः पुत्रः कस्मिन्देशे कुत्र नगरे समुत्पन्न इति ज्ञात्वा झडिति समागच्छ' इति । वेतालोऽपि 'महान्प्रसादः' इति निर्गत्य सागरवेलावलयितां सगिरिकाननां वसुन्धरां पर्यटन्प्रतिष्ठानगरं प्रविश्य कुत्रापि कुम्भकारगृहे कंचिन्माणवकं कांचित्कन्यकां च क्रीडन्तौ दृष्ट्वापृच्छत्—'कौ युवाम्?' इति । कन्या 'अहं

मम पुत्रः' इति प्रत्याह । वेतालः 'कस्ते पिता?' इति पुनरपृच्छत् । कन्या तु कञ्चन ब्राह्मणमदर्शयत् । ततो ब्राह्मणमपृच्छत् । ब्राह्मणः 'इयं मम कन्या, अस्याः पुत्रोऽयं बालः' इति प्रतिजगाद । तच्छ्रुत्वा परं विस्मयं गतो वेतालो ब्राह्मणं पुनरब्रवीत्—'भो ब्राह्मण कथमेतत्' इति । सोऽब्रवीत्—'देवानां चरित्रमगोचरम् । अस्याः रूपलावण्यातिशयमोहितः शेषो नागेन्द्रोऽनया सङ्गमे । तस्मादस्यां जातः पुत्रोऽयं शालीवाहननामा' इति । तदाकर्ण्य वेतालः सत्वरमुज्जयिनीमागत्य विक्रमादित्याय सर्वमपि वृत्तान्तमकथयत् । राजापि तस्मै पारितोषिकं दत्त्वा खड्गमादाय प्रतिष्ठानगरं प्रविश्य यावत्खड्गं शालीवाहने चिक्षेप तावत्तेन स्वयमेव हतः प्रतिष्ठानगरादुज्जयिन्यां निपपात । क्षतवेदनादह्यमानशरीरोऽनन्तरमेव जीवितमुत्ससर्ज । ततो मन्त्रिषु 'राज्यमपुत्रः कथं कर्तव्यम्' इति विचारयत्सु भट्टिः प्राह—'विचार्यतामासां राजमहिषीणां कापि गर्भिणी स्यात्' इति । ततो विचार्यमाणे कापि सप्तमासगर्भिणी समभूत् । तदा सर्वे मन्त्रिणो मिलित्वा गर्भस्याभिषेकं कृत्वा स्वयं राज्यं पर्यपालयन् । तदिन्द्रदत्तं सिंहासनं यदैव शून्यमासीत्तदा मध्येसभं काप्यशरीरिणी वागुदभूत्—'भो मन्त्रिणोऽस्मिन्सिंहासने समुपवेष्टुं विक्रमार्कसदृशो राजा कोऽपि नास्ति । तस्मादिदं सुक्षेत्रे निक्षिप्यताम्' इति । तच्छ्रुत्वा मन्त्रिणः कुत्रापि पवित्रे क्षेत्रे तत्सिंहासनं निक्षिप्य तत्क्षेत्रं यावनालचणकसमृद्धं कस्मैचिद्ब्राह्मणाय ददुः । ब्राह्मणोऽपि यत्र सिंहासनं निक्षिप्तं तदुच्चस्थानमिति पक्षिणामुत्थापनार्थं तदुपरि मञ्चं निक्षिप्य तत्रोपविश्य पक्षिणः समुत्थापयन्नवर्तत । ततः कदाचिद्भोजराजः ससैन्यो मृगयार्थमटन्राजकुमारैः समेतस्तत्क्षेत्रसमीपे प्राग्वदाजगाम तावन्मञ्चोपरि स्थितो ब्राह्मणः प्राह—'भो राजन्नेतत्क्षेत्रं फलितमस्ति । ससैन्येन समागत्य तत्रभवता यथेच्छं भुज्यताम् । अश्वेभ्यश्चणकादयो दीयन्ताम् । अद्य मम जीवितं सफलमासीद्यतो भवान्ममातिथिर्जातः । ईदृशास्त्वतिथिभिः कदापि न सन्दृश्यते' इति । तच्छ्रुत्वा राजा ससैन्यः क्षेत्रमध्यं प्रविवेश । ततो ब्राह्मणः पक्ष्युत्थापनाय मञ्चादवरुह्य क्षेत्रमध्ये प्र-

विष्टं राजानं दृष्ट्वा भीतोऽभणत्—'राजन्किमेवमधर्मः क्रियते ? । ब्राह्मणक्षेत्रमिदं विनाश्यते । यद्यन्यैरधर्मः क्रियेत तद्राज्ञे निवेदनीयम् । एवं सति त्वमेवान्याय्यं कर्तुं प्रवृत्तः । इदानीं को वा निवारयिष्यति ? । उक्तं च—

गजे कङ्करीये तु जारे राजनि वा पुनः ।
पापकृत्सु च विद्वत्सु नियन्ता जन्तुरत्र कः ॥ ११ ॥ इति ।

अन्यच्च । भवान्सर्वशास्त्राभिज्ञः कथं ब्राह्मणद्रव्यं विनाशयति । ब्रह्मस्वमेव हि विषम् । तथा हि—

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ १२ ॥ इति ।'

ततो यावद्राजा तत्क्षेत्राद्बहिः सपरिवारो निर्जगाम तावत्पक्षिणः समुत्थाप्य पुनर्मञ्चारूढो ब्राह्मणः प्राह—'भो राजन्किमिति गच्छसि ? । इदं क्षेत्रं साधु परिणतं दृश्यते । यावनालांश्चणकांश्च भक्षयन्तु तव परिवाराः । पश्योर्वारुकफलानि सन्ति । यथेष्टं भुज्यन्ताम्' इति । पुनर्ब्राह्मणवचनमाकर्ण्य सपरिवारो राजा यावत्क्षेत्रमध्यं प्रविवेश तावन्मञ्चादवरुह्य पुनस्तथैवाभणत् । ततो राजा स्वमनसि विचारयति स्म—'अहो ब्राह्मणो यदा मञ्चमारोहति तदास्य चेतसि दातव्यमिति बुद्धिरुत्पद्यते । यदावतरति तदा हीनबुद्धिरुत्पद्यते । अहं मञ्चमारुह्य पश्येयम्' इति यावन्मञ्चमारुरोह तावद्भोजराजस्य चेतस्येवं बुद्धिरुदभूत्—'ननु विश्वस्यार्तिः परिहर्तव्या । सर्वस्यापि लोकस्य दारिद्र्यं निवारणीयम् । दुष्टा दण्डनीयाः । शिष्टाः परिपालनीयाः । प्रजा धर्मेण रक्षणीयाः । किं बहुना । अस्मिन्समये यदि कोऽपि मम शरीरमपि प्रार्थयिष्यते तर्हि तदपि देयम्' इति । ततो राजा परमानन्दपरिपूर्णहृदयः पुनरपि विचारयति स्म—'एतत्क्षेत्रस्य माहात्म्यं स्वयमेवंविधां बुद्धिमुत्पादयति । कथमेतज्ज्ञायताम्' इति । ततो ब्राह्मणमाहूयापृच्छत् । 'भो ब्राह्मण तवैतत्क्षेत्रे कियाँल्लाभो भवति ?' इति । ब्राह्मणः—'भो राजन्भवान्सकलाभिज्ञः । अविदितं भवतः किमपि नास्ति । यदहमेतत्तत्त्वमालोचयतु' इति प्रत्यवदत् । ततो राजा ब्राह्मणमनेकधनधान्यादिना सं-

भा०थ क्षेत्रं वशीकृत्य मञ्चस्याधश्चखान । तत्र पुरुषमात्रे गर्ते शिलैका सुमनोहरादृश्यत । तच्छिलाधःप्रदेशे कापि चन्द्रकान्तशिला दृष्टा । ततो नानाविधरत्नखचितं द्वात्रिंशत्सालभञ्जिकासमलंकृतमतिरमणीयं सिंहासनमेकमदृश्यत । ततो भोजः परमानन्दामृतलहरीपूर्णहृदयः सिंहासनं नगरं नेतुं यावदुच्चालयामास तावदतिगरिष्ठमासनं नोच्चचाल । ततो राजा 'कुतः सिंहासनं नोचलति?' इति मन्त्रिणमपृच्छत् । मन्त्री तु 'राजन्दिव्यमेतदासनं बलिपूजादिकं विना नोचलेत्' इति प्रत्यवदत् । तच्छ्रुत्वा राजा ब्राह्मणानाकार्य सर्वमपि संविधानं कारितवान् । ततस्तत्सिंहासनं लघु भूत्वा स्वयमेवोच्चचाल । तदालोक्य राजा मन्त्रिणमुवाच— 'योऽनर्थं निवारयति असाध्यमर्थं च साधयति स एव मन्त्री' इति । ततो मन्त्री प्रत्यब्रवीत्— 'मन्त्रिणा स्वामिहितमेव कार्यं कर्तव्यम् । अन्यच्च, मन्त्रिणा विना राज्यं धान्यं विना दुर्गं कारुण्यं विना सौभाग्यं ज्ञानं विना वैराग्यं दुर्जनानां शक्तिः पाषण्डानां मतिः वेश्यानां विश्वासः खलानां मैत्री पराधीनस्य स्वातन्त्र्यं निर्धनस्याटोपः सेवकस्य कोपः कृपणस्य गृहं जारिण्याः पतिभक्तिः मूर्खाणां सङ्गतिः इत्येतत्सर्वं निष्फलम् । अपरं च, राज्ञा महतामर्चनं कार्यम् । आप्तानां बुद्धिर्ग्राह्या । देवब्राह्मणाः परिपालनीयाः । न्यायमार्गे वर्तितव्यम् । अपि च राजन्ये राजगुणास्ते सर्वे त्वयि विद्यन्ते । अतस्त्वं सकलराजराजोत्तमः । मन्त्रिणाप्येवंगुणगरिष्ठेन भवितव्यम् । स्वामिकार्यार्थमुद्यमः, पापाद्भयम्, प्रजानां हितम्, परिवाराणां संयोजनम्, राज्ञश्चित्तवृत्त्यनुसरणम्, अपायकार्याद्राजनिवारणम्, इत्यादयो ये मन्त्रिगुणास्तैर्युक्तः कुलक्रमागतः कामन्दकचाणक्यधौम्यशुकवाचस्पत्यादिनीतिशास्त्राभिज्ञो मन्त्रिपदयोग्यो भवति । पुरा किल नन्दभूपालो मन्त्रिणा बहुश्रुतेन ब्रह्महत्याया निवारितः । राजा—कथमेतत्? सोऽब्रवीत्—

विशालायां नन्दो नाम राजा महाशौर्यसंपन्नोऽभूत् । स निजबलेन प्रजार्थिनृपालान्स्वपादपद्मोपजीविनो विधायैकच्छत्रेण राज्यमकरोत् । तस्य च बहुश्रुतो नाम मन्त्री । भानुमती नाम महिषी । जयपालो नाम तनयः ।

तस्य राज्ञो महिष्यां भानुमत्यामतीव प्रीतिरासीत् । सिंहासनेऽपि सहैव तया समुपविशेत् । निमेषमपि तया विना न तिष्ठेत् । एकदा मन्त्री स्वमनस्यचिन्तयत् — 'अयं राजा निर्लज्जो मध्येसभं सिंहासने प्रियमुपवेशयति । तदा सर्वे जनास्तां पश्यन्ति । अनुचितमयं न जानाति । किं क्रियताम्' इति । तत एकदावसरं प्राप्य राजानमब्रवीत् — 'देव विज्ञाप्यमस्ति' इति । राजा 'किं तत्? कथ्यताम्' इत्याह । मन्त्री 'यदेषा भानुमती सिंहासने सहोपविशति तन्महदनुचितम् । 'असूर्यंपश्या राजदाराः' इति हि संप्रदायः । अत्र नानाजनाः समागत्य तां पश्यन्ति । अत इतः परं नैवं युक्तं कर्तुम्' इति विज्ञापयामास । ततो राजा 'भानुमत्यनालोकनं क्षणमपि न सहे । तदुपायं निरूपय' इत्याह । मन्त्री 'आलेख्यगतां तां पश्यतु देवः' इत्युपायमुपादिशत् । अनन्तरं राजा तद्वचनं समुचितं मत्वा चित्रकारमाहूय 'भानुमतीरूपं चित्रे निवेशय' इत्यादिदेश । स तु तस्या रूपं साक्षादालोक्य पद्मिनीलक्षणयुक्तां तां चित्रे विलिलेख । राजापि चित्रलिखितां प्रियां दृष्ट्वा प्रहृष्टस्तस्मै पारितोषिकं ददौ । अनन्तरं राजगुरुः शारदानन्दश्चित्रपटे निवेशितां भानुमतीं दृष्ट्वा चित्रकारमभाणीत् — 'भानुमत्याः सर्वमपि रूपमत्र लिखितम् । परं त्वेकं विस्मृतं त्वया' इति । चित्रकारः 'भोः स्वामिन् तत्किम्? कथय' इति सविनयमपृच्छत् । ततः शारदानन्दः 'तस्या वामजघनतले तिलसदृशं लक्ष्मास्ति । तन्न लिखितम्' इत्याह । राजा तु गुरोर्वचनं श्रुत्वा तद्वचनं तथ्यं ज्ञात्वा स्वमनस्यचिन्तयत् — 'कथमनेनास्या लक्ष्म ज्ञातम्? नूनमनया सहास्य संयोगो विद्यते । अपि च स्त्रीणां विषयेऽयं सन्देहो न कार्यः' इति । एवं विचार्य मन्त्रिणमाहूय सर्वमकथयत् । मन्त्रिणापि तस्मिन्समये तच्चित्तानुगुणं भणितम् । अनन्तरं राजा 'मन्त्रिन्यदि मम प्रियोऽसि तर्ह्यमुं शारदानन्दं मारय' इत्यादिशत् । सचिवोऽपि तथेति प्रतिज्ञाय जनानां पुरः शारदानन्दं दृढं बद्ध्वा वध्यस्थानमनयत् । तदा मन्त्री श्लोकमेकमपठत् —

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुरा कृतानि ॥ १३ ॥ इति ।

तच्छ्रुत्वा मन्त्री स्वमनस्यचिन्तयत्—'अहो एतत्सत्यं मिथ्या वा? । किमर्थं ब्राह्मणवधः क्रियते । महदयुक्तमिदम्' इति । अनन्तरं शारदानन्दं गूढं स्वभवनं नीत्वा भूगृहे निक्षिप्य राजसंनिधिमागत्य देव 'अनुष्ठितो भवदादेशः' इत्यवादीत् । राजापि 'साधु कृतम्' इति प्रशशंस । तत एकदा राजकुमार आखेटार्थं वनाय निर्जगाम । तदाकालवृष्ट्यादीनि दुर्निमित्तानि बभूवुः । तस्मिन्समये मन्त्रिपुत्रो बुद्धिसागरो दुर्निमित्तानि निरूप्य शतशो निवारयामास । जयपालस्तु तद्वचनमनादृत्य गन्तुं प्रावर्तत । ततो मन्त्रिपुत्रः प्राह—'भो जयपाल तव विनाशकालः समायातः । अन्यथा तवैवंविधा बुद्धिर्नोत्पद्येत । तथा चोक्तम्—

न निर्मितो वै न च दृष्टपूर्वो न श्रूयते हेममयः कुरङ्गः । [इति ।
तथापि तृष्णाजनि राघवस्य विनाशकाले विपरीतबुद्धिः ॥ १४ ॥

किंचोपार्जितानां कर्मणामुपभोगं विना विनाशो न स्यात् । तथा चोक्तम्—

सद्भावो नास्ति वेश्यानां स्थिरता नास्ति संपदाम् ।
विवेको नास्ति मूर्खाणां विनाशो नास्ति कर्मणाम् ॥ १५ ॥ इति ।

एवं बहुधा निवारयन्तं बुद्धिसागरमनादृत्य जयपालः खड्गव्याघ्रशरभमृगसमाकुलं महदरण्यं प्रविश्य यावत्पश्चाद्ददर्श तावत्सर्वोऽपि सैन्यवर्गो नगरमार्गे लग्नो दृष्टः । स्वयमेकाकी संवृत्तस्तुरगमात्रसहायः पुरः सरोवरमद्राक्षीत् । तत्राश्वादवतीर्य वृक्षशाखायामश्वं निबध्य जलमवगाह्य शान्तपिपासस्तरुच्छायायां विशश्राम । तदानीमतिभयङ्करः कश्चिद्व्याघ्रः समापतत् । तं दृष्ट्वाश्वश्छिन्नबन्धो यथागतमधावत् । राजकुमारोऽपि भयाद्वेपमानाङ्गः शाखामालम्ब्य द्रुममारुरोह । तत्र च पूर्वारूढं भल्लूकं दृष्ट्वा द्विगुणितभयं राजकुमारं भल्लूकः ससान्त्वमब्रवीत्—'भो राजकुमार मा भैषीः । अद्य मां शरणं गतस्त्वम् । अतस्तवाहं किमनिष्टं करिष्यामि? । मयि विश्वस्य व्याघ्रादपि न भेतव्यम्' इति । ततो राजकुमारः सभयमिदमभाणीत्—'भो ऋक्षराज! अहं त्वां शरणं गतः । विशेषतो भीतश्च । महत्पुण्यं शरणागतरक्षणेन ते भवेत् । उक्तं च—

एकतः क्रतवः सर्वे समग्रवरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥ १६ ॥ इति ।'

ततो भल्लूकेन विश्वासितो राजपुत्रः । अत्रान्तरे व्याघ्रोऽपि वृक्षमूलमाजगाम । सूर्यश्चास्तमगात् । ततो मृगयापरिश्रान्तो राजकुमारो निद्रापरवशो भल्लूकेनाङ्कमारोपितः सुखं सुष्वाप । तदवलोक्य व्याघ्रो भल्लूकमवादीत्—'भो ऋक्ष! अयं मनुष्यो नगरनिवासी, अस्मानेव हन्तुं वनमागतः । अतः शत्रुभूतमेनं कथमङ्के न्यवेशयः? । त्वयोपकृतोऽप्यपकारमेव ते करिष्यति । तस्मादमुमधः पातय' इति । तच्छ्रुत्वा भल्लूकः प्राह—'अयं कीदृशो वा भवतु । परं मां शरणं गतः । अतोऽमुं न पातयेयम् । शरणागतमारणेन हि महत्पातकं भवेत् । तथा च श्रूयते—

विश्वासघातकाश्चैव शरणागतघातकाः ।
वसन्ति नरके घोरे यावच्चन्द्रदिवाकरौ ॥१७॥ इति ।

अत्रान्तरे सुप्तोत्थितं राजकुमारं भल्लूकः प्राह—'भो राजकुमार! अहं निद्रां गमिष्यामि । त्वमत्राप्रमत्तस्तिष्ठ' इति । राजकुमारः 'तथा भवतु' इत्याह । ततो भल्लूको राजपुत्रसमीपे निद्रामवाप । तदा व्याघ्रः प्राह—'राजकुमार त्वमस्मिन्विश्वासं मा कुरु । यतोऽयं भल्लूकश्चञ्चलचित्तो दृश्यते । ततोऽस्य प्रसादोऽपि भयङ्करः । तथा चोच्यते—

क्षणे तुष्टाः क्षणे रुष्टाः वितुष्टाश्च क्षणान्तरे ।
अव्यवस्थितचित्तानां प्रसादोऽपि भयंकरः ॥ १८ ॥ इति ।

किंच त्वां मत्तो रक्षित्वा स्वयं हन्तुमिच्छति । अतस्त्वमेनमधः पातय । अहमेनं भक्षयित्वा गमिष्यामि । त्वमपि निजनगरं गन्तुमर्हसि' इति । तदाकर्ण्य राजपुत्रो जयपालो यावदेनमधः पातयितुमारेभे तावद्भल्लूको वृक्षात्पतन्नपि शाखान्तरमाललम्बे । तं दृष्ट्वा राजपुत्रो विफलप्रयत्नो बिभाय । तदा भल्लूकः 'भोः पापिष्ठ किमर्थं बिभेषि ?। यत्पुरार्जितं कर्म तत्त्वया भोक्तव्यम् । अतस्त्वं 'ससेमिरा' इति वदन्पिशाचो भूत्वा प्रतिवनं परिभ्रम' इति शशाप । ततः प्रभातमासीत् । व्याघ्रस्तु निरगात् । भल्लूकोऽपि यथेच्छं

जगाम । राजकुमारोऽपि 'ससेमिरा' इति वदन्पिशाचो भूत्वा वनेषु परिबभ्राम । ततोऽस्य तुरङ्गमो नगरमगमत् । तत्र राजपुत्ररहितमश्वं दृष्ट्वा जनाः केवलमश्वमागतं राज्ञे समाचख्युः । ततो राजा मन्त्रिणः समाहूय भणति स्म—'भो मन्त्रिणः मृगयार्थं कुमारे निर्गच्छति महद्दुर्निमित्तमासीत्किल । तथापि मत्तस्तदुल्लङ्घ्य वनं गतः । तस्य फलं सद्य एव समुपन्नतम् । तदारूढोऽश्वः शून्यः समागतः । ततस्तन्मार्गणाय वनं प्रति गमिष्यामि' इति । ततस्तेऽप्यङ्गीचक्रुः सभ्याः । ततो राजा मन्त्रिभिः परिवारेण च सह कुमारो येन मार्गेण गतस्तेनैव मार्गेण वनं प्राविशत् । ततो वनमध्ये परिभ्रमन्तं 'ससेमिरा' इति वदन्तं पिशाचभूतं सुतं दृष्ट्वा राजा महाशोकसागरनिमग्नस्तमादाय स्वनगरमागमत् । आगत्य च तदुन्मादशमनाय बहून्विधीन्कारयामास । केनापि कुमारः स्वस्थो न बभूव । तस्मिन्समये राजा मन्त्रिणं बहुश्रुतमभाणीत्—'अस्मिन्समये शारदानन्दस्तिष्ठेद्यदि क्षणमात्रेण चिकित्सां कुर्यात् । स मया वृथैव मारितः । पुरुषेण यत्कार्यं क्रियते तद्विचार्यैव कर्तव्यम् । तथा चोक्तम्—

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।
पश्चाद्भजति संतापं ब्राह्मणी नकुले यथा ॥ १९ ॥ इति ।

भवतु । तत्कर्मायत्तमभूत् । किमनेन गतचिन्तनेन । इदानीं महान्प्रयत्नः कर्तव्यः' इति । मन्त्री 'कथं कर्तव्यः ?' इत्यपृच्छत् । राजाब्रवीत्—'यः कोऽपि कुमारस्य चिकित्सां करिष्यति तस्यार्धराज्यं दास्यामि । सर्वानन्यांश्चाभीष्टान्प्रदास्यामीत्यभितो नगरमुद्घोषय' इति । ततो मन्त्री तथैव विधाय स्वभवनमागत्य शारदानन्दाय सर्वं निवेदयामास । तत्सर्वं श्रुत्वा शारदानन्दो बहुश्रुत 'मम गृहे कापि कन्या वर्तते । सा यद्येनं पश्येत्कमप्युपायं कुर्यात्' इति राज्ञे निवेदयेत्यवादीत् । तच्छ्रुत्वा मन्त्री राज्ञे तन्निवेदयामास । ततो राजा सपुत्रः सपरिवारो मन्त्रिगृहमागत्योपविवेश । राजपुत्रोऽपि 'ससेमिरा' इति वदन्नुपविष्टः । तदाकर्ण्य यवनिकान्तर्वर्ती शा-

रदानन्दः 'भो राजपुत्र' इत्यामन्त्रयत । तदा भूयोऽपि 'ससेमिरा' इति वदन्तं राजतनयमुद्दिश्यैवं पद्यं पपाठ—

सद्भावं प्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तानां हनने किं नु पौरुषम् ॥ २० ॥ इति ।

तत्पद्यं श्रुत्वा राजपुत्रश्चतुर्णां वर्णानामादिमं वर्णं परित्यज्य 'सेमिरा' इत्यवदत् । पुनश्च शारदानन्दो द्वितीयं पद्यमपठत्—

सेतुं दृष्ट्वा समुद्रस्य गङ्गासागरसंगमम् ।
ब्रह्महत्या प्रमुच्येत मित्रद्रोही न मुच्यते ॥ २१ ॥ इति ।

तत्पद्यं श्रुत्वा राजपुत्रो वर्णद्वयं परित्यज्य 'मिरा' इत्युक्तवान् । ततः शारदानन्दस्तृतीयं पद्यमपठत्—

मित्रद्रोही कृतघ्नश्च यस्तु विश्वासघातकः ।
त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥ २२ ॥ इति ।

ततो वर्णत्रयं परित्यज्य 'रा' इत्यब्रवीत् । तच्छ्रुत्वा शारदानन्दश्चतुर्थं पद्यमपाठीत्—

भो राजंस्तव पुत्रस्य यदि कल्याणमिच्छसि ।
दानं देहि द्विजातिभ्यो वर्णानां ब्राह्मणो गुरुः ॥ २३ ॥ इति ।

ततो राजपुत्रः स्वस्थमनाः सावधानश्च पितुर्भल्लूकवृत्तान्तं सर्वमकथयत् । तच्छ्रुत्वा राजा शारदानन्दमपृच्छत्—

'ग्रामे वससि कल्याणि विपिनं नैव गच्छसि ।
ऋक्षव्याघ्रमनुष्याणां कथं जानासि भाषितम् ॥ २४ ॥' इति ।

तच्छ्रुत्वा शारदानन्दः प्रत्यवादीत्—

'देवाद्विजप्रसादेन वाणी जिह्वां ममाश्रिता ।
तेनाहमभिजानामि भानुमत्या यथाङ्कितम् ॥ २५ ॥' इति ।

तच्छ्रुत्वा राजा महाश्चर्यभरितमना यावद्यवनिकामाचकर्ष तावच्छारदानन्दः साक्षाददृश्यत । ततः सपुत्रो राजा तं प्रणनाम । तदा मन्त्रिणा राज्ञे पूर्ववृत्तान्तः कथितः । अनन्तरं राजा मन्त्रिणं प्रत्युवाच । तव संसर्गेणा-

हमकीर्तेर्निवृत्तोऽस्मि । अतस्त्वादृशेन सत्पुरुषेण सङ्गो विधेयः । तथा च वदन्ति —

वारयति वर्तमानामापदमागामिनीं च सत्सङ्गः ।
तृष्णां च हरति पीतं गङ्गाया दुर्गतिं च सद्योऽम्भः ॥ २६ ॥ इति ।

एवं बहुधा मन्त्रिणं स्तुत्वा वस्त्रादिना सम्भाव्य राजा राज्यमकरोत् । ”

इति मन्त्री भोजराजं प्रति कथां कथयित्वा पुनरब्रवीत् — ‘ यो राजा मन्त्रिवाक्यं शृणोति स दीर्घायुः सुखी च भवति ’ इति । ततो भोजराजो मन्त्रिणं सम्भाव्य तत्सिंहासनं पुरं नीत्वा तत्र सहस्रमणिस्तम्भैर्मण्डपं कारयित्वा तस्मिन्सुमुहूर्ते सिंहासनं प्रतिष्ठाप्य दिव्यौषधियुक्तैः पुण्यतीर्थोदकैर्मन्त्रपूर्वकं द्विजैरभिषेचितः परन्ध्रीभिर्नीराजितः कविभिर्विप्रैराशीर्भिरभिनन्दितो वन्दिभिः प्रशंसितश्चातुर्वर्ण्यं दानमानाभ्यां संमान्य दीनान्धबधिरकुब्जादिभ्यो बहूनि धनानि दत्त्वा छत्रचामराङ्कितो यावत्सिंहासनसालभञ्जिकामस्तके पदपद्मे निधायारोढुमाजगाम तावत्सालभञ्जिका मनुष्यवाचा राजानमब्रवीत् — ‘ भो महीपाल तव विक्रमस्येव शौर्यौदार्यसाहसादयो यदि विद्यन्ते तदास्मिन्सिंहासने समुपवेष्टुमर्हसि ’ इति । राजा तु ‘ ममाप्यौदार्यादिकमन्यूनमस्ति ’ इति प्रत्यवदत् । तच्छ्रुत्वा सालभञ्जिका भणति स्म — ‘ राजन्नेतदेव तवानुचितम् । यदात्मनात्मानं प्रशंससि । यः स्वगुणान्परदोषान्वा कीर्तयति स केवलं दुर्जनः । सज्जनस्तु न तथा वक्ति । उक्तं हि —

स्वगुणानिव परदोषान्वक्तुं शक्नोति दुर्जनो लोके ।
स्वगुणान्वा परदोषान्कदापि न हि वक्ति सज्जनः सत्यम् ॥ २७ ॥ इति ।

इत्थं सालभञ्जिकयोक्तं निशम्य विस्मितो भोजराजस्तामवदत् । सत्यमुक्तं त्वया । यः स्वगुणान्कीर्तयति स मूर्खः । मया यत्स्वगुणाः कीर्तितास्तदनुचितमेव । तिष्ठत्वेतत् । यस्यैतत्सिंहासनं तस्यौदार्यादिकं कथय । श्रोतुं वाञ्छति मे श्रोत्रम् । सालभञ्जिकाभणत् — ‘ भो राजन्नेतत्सिंहासनं देवस्य विक्रमार्कस्य । स सन्तुष्टः कोटिशोऽर्थिने प्रयच्छेत् । उक्तं च —

निरीक्षिते सहस्रं तु नियुतं तु प्रजल्पिते ।
हसिते लक्षमाप्नोति तुष्टेऽर्थी कोटिशो नृपे ॥ २८ ॥ इति ।

किमेवंविधमौदार्यं त्वयि विद्यते ?' इति । श्रुत्वा भोजराजस्तूर्ष्णीं प्रत्यावर्तत ॥

इति प्रथममुपाख्यानम् ।

———(*)———

अथ द्वितीयमुपाख्यानम् ।

भूयोऽप्येकदा भोजराजः शुभे मुहूर्ते यावद्विक्रमार्कसिंहासनमारोढुमाजगाम तावद्द्वितीयसोपानस्था सालभञ्जिकाभणत् । 'भोजराज विक्रमार्कस्यौदार्यादिकं यदि त्वयि विद्यते तदास्मिन्सिंहासने समुपविश' इति । राजा प्राह— 'सालभञ्जिके कथय तस्यौदार्यादिकम्' इति । ततः सा तद्वृत्तान्तं वक्तुमारेभे— "विक्रमादित्यो राज्यं कुर्वन्नेकदा चारानाहूयाब्रवीत्— 'सर्वतः पृथिवीं परिभ्रमत । यत्र यत्र कौतुकप्रदं तीर्थं देवायतनमन्यानि वा तथाविधानि विलोकयथ तन्मम निवेदयत' इति । चारास्तु 'यदाज्ञापयति देवः' इति निष्क्रान्ताः । अथैकदा देशान्तरं परिभ्रम्यागतः कश्चिद्दूतो राजानं प्रणम्य व्यजिज्ञपत्— 'देव चित्रकूटपर्वतनिकटवर्तितपोवनमध्ये मनोहरः कश्चिद्देवालयोऽस्ति । तत्र च पर्वतेऽत्युदग्राच्छिखराद्विमला कापि जलधारा पतति । तत्र स्नानमात्रेण महापातकादीन्यपि नश्यन्ति । किंच यस्तु पापीयांस्तत्र स्नानमाचरति तस्याङ्गादतीव कलुषमुदकं निःसरति । तेन स पूतो भवति । अन्यच्च तत्र कश्चिद्ब्राह्मणो महति होमकुण्डे प्रतिदिनं जुहोति । न जाने तस्य कति वत्सरा गता इति । प्रतिदिनं कुण्डाद्बहिः प्रेरितं भस्म पर्वताकारं दृश्यते । स केनापि न भाष्यते । एवमतिचित्रं स्थानमद्राक्षीदयं जनः' इति । तच्छ्रुत्वा राजा स्वयमेकाकी तेन सह तं गिरिं गत्वा परममानन्दं प्राप्य 'अहो पवित्रमिदं स्थानम् । अत्र साक्षाज्जगदम्बिका वसति । पश्यत एव मे मनो विमलं भवति । किं पुनश्चिरं निवसताम्' इति ब्रुवंस्तत्र निर्झरे स्नात्वा देवतां प्रणम्य यत्र ब्राह्मणो होमं करोति तत्र गत्वा तमपृच्छत् । ब्राह्मणः 'यदा सप्तर्षिमण्डलं

रेवतीप्रथमचरणमध्यास्त तदाहमयतिषि । इदानीं तदश्विनीनक्षत्रे तिष्ठति । जुह्वतो मे वर्षशतमभूत् । तथापि देवता प्रसन्ना नाभवत्' इति । तच्छ्रुत्वा राजा स्वयं देवतां स्मृत्वा जुहाव । तथापि देवता प्रसादं न विदधे । अनन्तरमिष्टसाहसो राजा स्वशीर्षमुत्कृत्य जुहोमीति पर्यालोच्य यावत्कण्ठे खड्गं निचिक्षेप तावद्देवता कृपाणं गृहीत्वाब्रवीत्—'भोः साहसिन्प्रसन्नास्मि वरं वृणीष्व' इति । राजापृच्छत्—'अयं ब्राह्मणश्चिरादतिनियमेन जुहोति । कुतोऽस्य ममेव प्रसादं न कृतवती ?' इति । ततो देवता प्राह— 'भो राजन्नयं चिरादनुतिष्ठत्येव । परमस्य चेतः स्वस्थं न बभूव । चञ्चलचित्तस्य तपः फलाय न कल्पते । उक्तं च—

अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं पर्वलङ्घनैः ।
व्यग्रचित्तेन यज्जप्तं त्रिविधं निष्फलं भवेत् ॥ १ ॥ इति ।

तथाच, न काष्ठे विद्यते देवो न पाषाणे न मृन्मये ।
भावे हि विद्यते देवस्तस्माद्भावो हि कारणम् ॥ २ ॥

किं च, मन्त्रे तीर्थे द्विजे दैवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥ ३ ॥ इति ।'

ततो राजा प्राह—'यदि मम प्रसन्ना भवती तर्ह्यस्य ब्राह्मणस्य मनोरथं पूरय' इति । देवी जगाद—'भो विक्रम महाद्रुम इव स्वदेहश्रममविगणय्य परेषां श्रमं परिहरसि । उक्तं च—

छायामन्यस्य कुर्वन्ति स्वयं तिष्ठन्ति चातपे ।
फलन्ति च परार्थेषु नात्महेतोर्महाद्रुमाः ॥ ४ ॥ इति ।'

एवं राजानं स्तुत्वा ब्राह्मणस्य मनोरथमापूर्यान्तरधात् । ततो राजा स्वनगरमगमत्" । इतीमां कथां कथयित्वा सालभञ्जिका भोजमब्रवीत्—'त्वमेतदासनमारोढुमभिलषसि । विक्रमार्कगुणास्तु त्वयि न दृश्यन्ते' इति । तच्छ्रुत्वा राजा तूष्णीं बभूव ॥

इति द्वितीयमुपाख्यानम् ।

अथ तृतीयमुपाख्यानम् ।

पुनरपि भोजे कदाचित्सिंहासनमारोढुमागते तृतीया सालभञ्जिकावदत्
'भो राजन्नेतत्सिंहासनं तेनाध्यासितव्यम् । यस्मिन्विक्रमस्यौदार्यं विद्य
इति । भोजः प्राह— 'सालभञ्जिके तस्यौदार्यवृत्तान्तं ब्रूहि' इति ।
लभञ्जिकावदत्— "राजन्विक्रमसदृशो भूमण्डले कोऽपि नास्ति । त
चेतस्यणुमात्रमपि विकल्पो नासीत् । उक्तं च—

अयं निजः परश्चेति विकल्पो लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ १ ॥ इति ।

किंच साहसेन दीनरक्षणेन धैर्येणातिथिमनोरथपूरणेन च न कोऽपि वि
ममतिशेते । एवं सकलगुणाधिवासो विक्रमः सर्वसंपत्परिपूर्णः सकल
महीमण्डलं पालयन्नेकदा स्वमनस्यचिन्तयत्— 'अनित्योऽयं संसारः
कदा कस्य किं भविष्यतीति न ज्ञायते । अतः समुपार्जितं द्रव्यं दानभो
भ्यां सफलं कर्तव्यम् । उक्तं च—

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवत्येव ॥ २ ॥ इति

तथाच, दातव्यं भोक्तव्यं सति विभवे संग्रहो न कर्तव्यः ।
पश्येह मधुकराणां संचितमर्थं हरन्ति लोकेऽन्ये ॥ ३ ॥

अतः, अनुभवत दत्त वित्तं मान्यं मानयत सज्जनं भजत ।
अतिपरुषपवनलुलिता दीपशिखेवातिचञ्चला लक्ष्मीः ॥ ४

इत्येवं विचार्य सर्वस्वदक्षिणं कमपि यज्ञं कर्तुमुपाक्रमत । ततः शिल्पिभि
तिमनोहरं यज्ञायतनं कारयामास । सर्वा अपि यज्ञसामग्रीः संपादयामास
देवऋषियक्षगन्धर्वसिद्धादीनाह्वापयत् । ब्राह्मणाश्च समाजग्मुः सर्वे राजा
बान्धवाश्च । तत्रान्तरे राजा समुद्राह्वानाय कञ्चनं ब्राह्मणं प्रेषयामास
सोऽपि समुद्रतीरं गत्वा गन्धपुष्पाक्षतादिभिः समुद्रमभ्यर्च्य 'भगवन्रत्नाव
विक्रमार्को यज्ञं करिष्यति । तेन प्रेषितोऽहं त्वदाह्वानार्थं समागतोऽस्मि
इति ब्रुवन्जलमध्ये पुष्पाञ्जलिं विक्षिप्य क्षणं तस्थौ । तत्र न कोऽपि प्रत्युवाच

ततो ब्राह्मणस्तटान्निवृत्य यथागतं यावदाजगाम तावद्देदीप्यमानशरीरः कश्चिन्महीसुरः समागत्यावदत् — 'त्वं किल विक्रमेणास्मानाह्वातुं प्रेषितः । तेन या सम्भावना कृता सास्मान्प्राप्तैव । किं तु मम नायमवसरः समागन्तुम् । यथाहमुपकरिष्यामि । अमूल्यानि रत्नानि चत्वारि दास्यामि । प्रयच्छ तस्मै । तेषां माहात्म्यं शृणु—एषामेकं रत्नं यद्धनादि वस्तु स्मर्यते तद्ददाति । द्वितीयं यत्तु भक्ष्यभोज्यादिकममृतकल्पं तदुत्पादयति । तृतीयं हस्त्यश्वरथपदातियुक्तं बलं जनयति । चतुर्थं दिव्यं वस्त्राभरणादिकं प्रसूते' इति । एवमभिधाय रत्नानि दत्त्वा समुद्रोऽन्तरधात् । तदनन्तरं ब्राह्मणस्तानि गृहीत्वा चिरादुज्जयिनीमगमत् । अत्रान्तरे यज्ञं समाप्य राजावभृथस्नानं विधाय सर्वाँल्लोकान्परिपूर्णमनोरथानकरोत् । ब्राह्मणोऽपि राजानमवलोक्य मणीनां गुणानकथयत् । राजा 'ब्राह्मण यज्ञदक्षिणाकालमतिलङ्घ्य समागतोऽसि । सर्वस्वमर्थिसात्कृत्य केवलोऽस्मि । अतस्त्वमेतेषां रत्नानां यदेकं तुभ्यं रोचते तद्गृहाण' इत्यवादीत् । ब्राह्मणः 'महाराजाहं गृहिणीं पुत्रं स्नुषां च पृष्ट्वा सर्वेभ्यो यद्रोचते तद्गृह्णामि' इत्यवदत् । राजा 'तथा कुरु' इत्याह । ब्राह्मणोऽपि स्वभवनमागत्य तद्वृत्तान्तं तेषामकथयत् । तन्निशम्य पुत्रोऽभ्यभाषत—'यद्रत्नं चतुरङ्गं बलं ददाति तद्ग्रहीष्यामः । तेन हि राज्यमायाति' इति । पिता जगाद— 'प्राज्ञो राज्यं नापेक्षेत । राज्यापेक्षयैव हि युधिष्ठिरादयो महद्दुःखमन्वभूवन् । अतो यस्माद्धनादिकं लभ्यते तद्गृह्णीमः । तेन तु सर्वमपि लभ्यते । उक्तं च—

न तदस्ति जगत्यस्मिन्यदर्थेन न सिध्यति ।
अतोऽस्मिन्भुवने धीमान्धनमेकं प्रसाधयेत् ॥ २ ॥ इति ।

ततो भार्याब्रवीत्—'यद्रत्नं षड्रसोपेतं चतुर्विधान्नं प्रसूते तद्ग्रहीतव्यम् । यतः सर्वेषां प्राणिनामन्नमेव जीवधारणम् । तथा चोक्तम्—

अन्नं विधात्रा विहितं मर्त्यानां जीवधारणम् ।
तदनादृत्य मतिमान्प्रार्थयेन्न तु किं चन ॥ ३ ॥ इति' ।

स्नुषा तु 'यद्रत्नं वस्त्राभरणादिकं प्रसूते तद्ग्राह्यम्' इत्याह । एवं पर-

स्परं चतुर्णां विवादः समजायत । ततो ब्राह्मणो राज्ञः समीपमागत्य विवादं न्यवेदयत् । राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ ।।" इति कथां कथयित्वा सालभञ्जिका भोजमब्रवीत्— 'त्वय्येवंविधमौदार्यं विद्यते चेदस्मिन्सिंहासने समुपविश' इति । तच्छ्रुत्वा राजा तूष्णीं बभूव ।

इति तृतीयमुपाख्यानम् ।

———(*)———

अथ चतुर्थमुपाख्यानम् ।

भूयोऽप्येकदा सिंहासनमारोढुमागच्छति भोजे तुरीया सालभञ्जिका भणति स्म— 'यदि त्वमौदार्येण विक्रमार्कमनुसरेस्तर्हीदं सिंहासनमारोह' इति । राजा 'ब्रूहि मे तस्यौदार्यवृत्तान्तम्' इत्यपृच्छत् । ततः सालभञ्जिका कथयितुमारेभे—"विक्रमादित्ये राज्यं कुर्वति सत्युज्जयिन्यां कोऽपि ब्राह्मणः सकलविद्याविचक्षणः सकलगुणालंकृतश्च परं पुत्रहीनः समभवत् । तमेकदा तत्प्रेयसी जगाद— 'भोः प्राणनाथ पुत्रं विना गृहस्थस्य गतिर्नास्तीति श्रुतिस्मृतिपुराणविदः समामनन्ति । तथा हि—

अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ।
तस्मात्पुत्रमुखं दृष्ट्वा भवेत्पश्चात्तु तापसः ।। १ ।। इति ।
शर्वरीदीपकश्चन्द्रः प्रभातोद्दीपको रविः ।
त्रैलोक्यदीपको धर्मः सुपुत्रः कुलदीपकः ।। २ ।। इति च ।

तदाकर्ण्य भूसुरः— 'प्रिये सत्यमवादीः । किं तु परमेश्वरप्रसादं विना सन्ततिर्न लभ्यते । अतो भवानीवल्लभमाराधयामः' इत्युक्त्वा परमेश्वराराधनाय तपः कर्तुमारभत । अथैकदा रात्रौ स्वप्ने वृषभारूढः शैलतनयसमाश्लिष्टवामतनुश्चन्द्रकलावतंसः परमेश्वरः प्रत्यक्षो भूत्वावदत्— 'वत्स प्रदोषव्रतमाचर । तेन तव पुत्रो भविष्यति' इति । ब्राह्मणस्तु प्रबुध्य ससम्भ्रममुत्थाय स्वप्नवृत्तान्तं वृद्धेभ्यो निवेदयामास । ते च 'यथार्थोऽयं स्वप्नः । अस्मिन्व्रतेऽनुष्ठिते सर्वथा तव पुत्रो भविष्यति' इति जगदुः । ततो ब्राह्मणस्तेषां वचनं मनसि कृत्वा मार्गशीर्षशुक्लत्रयोदश्यां मन्दवासरे कल्पो-

क्तप्रकारेण प्रदोषव्रतमन्वतिष्ठत् । परमेश्वरश्च प्रसन्नो भूत्वा पुत्रमस्मै प्रायच्छत् । तदनन्तरं ब्राह्मणस्तस्य जातकर्म विधाय द्वादशे दिवसे देवदत्त इति नाम कृत्वावशिष्टान्यन्नप्राशनचौलोपनयनादीनि कर्माण्यपि यथाकालमन्वतिष्ठत् । वेदान्साङ्गानध्यापयामास । ततः षोडशे वर्षे गोदानादिकं विधाय सुरूपां बुद्धिशीललक्षणसंपन्नां कामपि कन्यकामन्विष्य विवाहं कृत्वा जीवनं परिकल्प्य स्वयं तीर्थयात्रां कर्तुकामः पुत्राय बुद्धिमेवमुपदिदेश — 'वत्सातिकष्टां दशां प्राप्तोऽपि स्वधर्माचारं मा परित्यज । परैः सह विवादं मा कार्षीः । सर्वभूतेषु दयां कुरु । परमेश्वरे भक्तिं विधेहि । परस्त्रियो मा विलोकय । बलवद्भिर्विरोधं मा कुरु । सज्जनानाश्रय । दुर्जनान्परिहर । स्त्रीभ्यो गुह्यं मा वद' इति । एवमन्याश्च नीतीरुपदिश्य स्वयं वाराणसीं जगाम । ततो देवदत्तः पितुरुपदेशं पालयंस्तत्रैव नगरे सुखमुवास । अथैकदा होमाय समिधः समाहर्तुं महदरण्यं प्रविश्य यावत्समिधश्चिच्छेद तावद्विक्रमो मृगयार्थं विपिनमवगाह्य महान्तमेकं सूकरमनुधावंस्तत्रागत्य देवदत्तं दृष्ट्वा पुरमार्गमजानन्पप्रच्छ । तेन पृष्टो देवदत्तः स्वयमग्रे गच्छन्राजानं नगरमनयत् । अनन्तरं राजा देवदत्तं बहुधा संमान्य कुत्रापि राजकार्ये न्ययुङ्क्त । एवं महान्कालः समतिचक्राम । अथैकदा राजा तं मध्येसभमवादीत् — 'कथमहं त्वत्कृतादुपकारादुत्तीर्णो भविष्यामि । यन्मां महतोऽरण्यान्नगरमनयः' इति । तदा सभ्यः कोऽपि जगाद । 'हन्तायं महापुरुषः, यत्कृतमुपकारं चिरादपि न विस्मरति । तथा चाहुः—

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
सलिलममृतकल्पं दद्युराजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥ ३ ॥ इति ।

ब्राह्मणस्तु राज्ञो वचनं श्रुत्वा स्वमनसि विचारयति स्म— 'किमयं राजा मामेवं वदति । किं नामाहमुपाकरवम् । किमेतत्सत्यमुत मिथ्या ? । अस्य तत्त्वं बोधेयम्' इति । ततः एकस्मिन्दिवसे राजकुमारमपहृत्य स्वमन्दिरे

सङ्गोप्य तस्य कण्ठभूषणमेकं स्वभृत्यहस्ते दत्त्वा विपण्यां विक्रेतुं प्रैषयत् । अस्मिन्नवसरे राजकुमारः केनाप्यपहृतो मारितश्चेति राजमन्दिरे महान्कोलाहलः समभवत् । राजापि पुत्रमार्गणाय सर्वत्राधिकारिणः प्राहिणोत् । ते च सर्वतः परिभ्रमन्तो विपणिमध्ये दैवादाभरणहस्तं देवदत्तभृत्यमपश्यन् । ततस्तदाभरणं राजकुमारस्येति ज्ञात्वा तं बद्ध्वा राजसमीपं निन्युः । राजापि तं दृष्ट्वोवाच— 'रे भृत्य कथमेतदाभरणं तव हस्ते समागतम् ?' इति । भृत्यः प्राह— 'अहं देवदत्तस्य भृत्यः । विपणिमध्ये एतदाभरणं विक्रीय धनमानयेति प्रेषितोऽस्मि' इति । ततो राजा देवदत्तमाहूय पप्रच्छ— 'एतदाभरणं कस्ते ददौ' इति । देवदत्तः प्रत्यभाषत—'अहमेव धनलोलुपस्तव कुमारं हत्वा भूषणानि गृहीत्वा तेषामिदमेकमाभरणं विक्रेतुमदाम् । इदानीं यत्तुभ्यं रोचते तत्कुरु । मम प्राक्तनकर्मवशादेवं बुद्धिरुत्पन्ना' इति । तदाकर्ण्य राजा किमपि प्रतिकर्तुं न शशाक । तदा सभ्यः कश्चिदाह— 'अहो सर्वधर्मशास्त्रवेत्तायं कथमीदृशे कर्मणि बुद्धिमकरोत्' इति । अपरः कश्चिदुवाच— 'स्वकर्मणा प्रेरितस्यैवं बुद्धिरजायत । किमत्र चित्रम् ?' इति । इतरे केचन राजानमब्रुवन्— 'देव यदयं बालघाती सुवर्णस्तेयी च ततः खादिरेण शूलेन हन्तव्यः' इति । तदा मन्त्रिणः प्राहुः— 'इमं तिलशः खण्डयित्वैतन्मांसेन गृध्रेभ्यो बलिर्दातव्या' इति । तेषां वचनं श्रुत्वा राजा जगाद— 'भोः सखायः, अयं ममाश्रितः पुरमार्गप्रदर्शनादुपकारी च । अतोऽस्मिन्गुणदोषचिन्ता न कर्तव्या । तथा च वदन्ति —

चन्द्रः क्षयी प्रकृतिवक्रतनुः कलङ्की
दोषाकरः स्फुरति मित्रविपत्तिकाले ।
मूर्ध्ना तथापि सततं ध्रियते हरेण
नैवाश्रितेषु महतां गुणदोषचिन्ता ॥४॥ इति ।

अन्यच्च, उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ५ ॥ इति ।

अथ देवदत्तमवलोक्य 'सखे किंचिदपि भयं चेतसि मा कार्षीः ! मम

पुत्रो बलीयसा पुराकृतेन कर्मणा हतः । किं नाम त्वया कृतम् । अन्यच्च, महारण्ये पतितं मां नगरमनैषीः किल । अतः प्रत्युपकारसहस्रैरपि न तावकमृणमपनेतुं प्रभवामि' इति समाश्वास्य तं वस्त्राभरणादिना सम्भाव्य विससर्ज । देवदत्तस्तु परमानन्दभरितस्तं कुमारं स्वगृहादानीय राज्ञे ददौ । ततः सविस्मयेन राज्ञा भाणि— 'देवदत्त किमेवं कृतम्?' इति । देवदत्तः प्राह— "भो राजन् श्रूयताम् भवता सभामध्ये बहुवारं 'कथं देवदत्तकृतादुपकारादुत्तीर्णो भविष्यामि' इति भणितम् । अतस्तव चित्तपरीक्षार्थं मयैवं कृतम् । क्षन्तव्योऽयमपराधः" इति । ततो राजा परं सन्तुष्य देवदत्तं भूयोऽपि बहुधा संमान्य प्रेषयामास । सोऽपि राज्ञा संमानितः परं विस्मयमापन्नो राज्ञः कृतज्ञतामौदार्यादिकं च प्रशंसन्स्वगृहमयासीत्" । इति कथां कथयित्वा सालभञ्जिका भोजमब्रवीत्— 'राजन् किं त्वय्येवंविधा गुणा विद्यन्ते?' इति । तच्छ्रुत्वा राजा तूष्णीं निर्जगाम ॥

इति चतुर्थमुपाख्यानम् ।

———(*)———

अथ पञ्चममुपाख्यानम् ।

पुनरपि भोजे समागत्य सिंहासनसोपाने पदं विन्यस्यति पञ्चमी सालभञ्जिका निवार्य गिरमेवं व्याजहार— "विक्रमादन्यः कोऽपि नेदमारोढुमर्हति । श्रूयतां ब्रवीमि तस्यौदार्यम् । विक्रमे महीं पालयति सत्येकदा कश्चिद्रत्नवणिक्समागत्यानर्घमेकं रत्नं राजहस्ते समर्पितवान् । राजा देदीप्यमानं तदादाय परीक्षकानाकार्य 'कीदृशमेतद्रत्नम्? कियन्मूल्यमर्हति? निश्चित्य कथयत' इत्यवादीत् । ततः परीक्षकास्तद्रत्नं साधु निरूप्य 'राजन्नमूल्यमेतद्रत्नम् । अस्य मूल्यं निर्णेतुं न कोऽप्यत्र प्रभवति' इत्यूचुः । तदाकर्ण्य राजा तस्मै भूरि द्रव्यं दत्त्वा 'भोः सार्थवाह किमीदृशमन्यदस्ति?' इत्यपृच्छत् । वणिक् 'देव नात्र सन्ति । ग्रामे तु दश विद्यन्ते । यद्यपेक्षा देवस्य तर्हि प्रेषयिष्यामि' इत्युवाच । अनन्तरं राजा तेषामेकैकस्य चतुःसहस्रं सुवर्णानि मूल्यं निर्णीय तावद्धनं दत्त्वा सहैव तेन चतुरमेकं भृत्यं

प्राहिणोत् । 'अष्टभिर्दिवसैरत्रागन्तव्यम्' इति चादिदेश । सोऽपि 'यदाज्ञापयति देवः' इति तदाज्ञां शिरसि कृत्वा झडिति निर्जगाम । रत्नानि गृहीत्वा समागच्छति च तस्मिन्मध्येमार्गं महती वृष्टिः समभवत् । तत्र चोभयकूलङ्कषा नद्येका प्रवहति स्म । स तदुत्तरं तीरं गन्तुमशक्नुवन्नाविकमाहूयावदत्—'नाविक रत्नहारं मामिमां नदीमुत्तारय' इति । नाविकः प्राह—'अये पथिक, एषा नदी वेलामतिक्रम्य प्रवहति । कथमुत्तार्यताम् । किं च प्रवाहोत्तरणं बुद्धिमता वर्जनीयम् । तथा चाहुः—

महानदीप्रतरणं महापुरुषनिग्रहम् ।
महाजनविरोधं च दूरतः परिवर्जयेत् ॥ १ ॥ इति' ।

भृत्यः 'अये कर्णधार यदुक्तं त्वया तत्सत्यमेव । तथापि यद्यहमद्यैव रत्नैः सह देवस्य पादमूलं न गच्छेयं तदाज्ञाभङ्गाद्राजा मां निग्रहीष्यति । अतोऽवश्यमिदानीं मामुत्तारयितुमर्हसि' इत्यवदत् । 'तर्हि पञ्च रत्नानि यदि मह्यं दास्यसि तर्हि त्वामुत्तारयिष्यामि' इति नाविको जगाद । ततो भृत्यस्तस्मै पञ्च रत्नानि दत्त्वा नदीमुत्तीर्य राजसमीपमागत्य सविनयं प्रणम्य पञ्च रत्नानि तस्मै ददौ । तदा राजाब्रवीत्—'कुत्रावशिष्टानि पञ्च रत्नानि?' इति । भृत्यः 'देव श्रूयताम् । विज्ञापयामि । अयं जनो यदादेशमितो निर्गत्य वणिजा सह तद्ग्रामं प्रविश्य तेन दत्तानि दश रत्नानि गृहीत्वा ततो निर्गत्य यावदागच्छं तावन्मार्गे कापि वृष्टिरतिमहती समभूत् । तत्रा कापि तटिनी कूलमुल्लङ्घ्यातिभयङ्करा प्रवहति स्म । अहं तु यथादिष्टकाले देवस्य चरणौ पश्येयमिति नदीमुत्तरितुं नाविकाय पञ्च रत्नानि दत्तवानस्मि । यथादिष्टः समयोऽतिलङ्घ्येत तदाज्ञाभङ्गो भवेत् । अत एवं कृतवानस्मि । तदुपरि देवः प्रमाणम्' इति व्याहृत्य विरराम । राजा तु तद्वचनं श्रुत्वा परं सन्तुष्टोऽवशिष्टान्यपि रत्नानि तस्मै प्रादात् । भृत्यश्च परमानन्दभरितः स्वगृहमगात्" । इति कथां कथयित्वा सालभञ्जिका भोजमाह—'यद्येवंविधमौदार्यं त्वयि विद्यते तदोपविश' इति । तदाकर्ण्य भोजस्तूष्णीं न्यवर्तत ॥

इति पञ्चममुपाख्यानम् ।

अथ षष्ठमुपाख्यानम् ।

पुनरपि भोजः कदाचिच्छुभे मुहूर्ते समुचितालङ्कारः सिंहासनमारोढुं यावदाजगाम तावदपरा सालभञ्जिका निवार्य बभाण— 'भो राजन्यः पुनरौदार्येण विक्रममनुकरोति स एव सिंहासनमिदमधिरोढुमर्हति । श्रूयतां तस्यौदार्यम्— "विक्रमो राज्यं कुर्वन्नेकदा वसन्तोत्सवे सकलान्तःपुरवधूसमेतः क्रीडार्थं शृङ्गारवनमगमत् । नानाविधतरुलतोपशोभिते कोकिलकूजितैर्भ्रमरझंकारैश्च श्रुतिमनोहरे तस्मिन्नुपवने समुद्दीपितरतिकौतुको राजा कदाचिद्वापीषु, कदाचित्कुसुमास्तीर्णेषु लताभवनेषु, कदाचित्तरुतलेषु, कदाचिच्चन्द्रकान्तशिलातलेषु च सहैवान्तःपुरवनिताभिर्विहरन्महान्तं कालमनैषीत् । तत्र कश्चिद्ब्रह्मचारी कुत्रापि तरुतले तपश्चरन्राजानं तत्रागतं दृष्ट्वा स्वमनस्यचिन्तयत्— 'अहो तपश्चरता मया कालो वृथैव नीतः । स्वप्नेऽपि किंचित्सुखं नानुभूतम् । यावज्जीवं कष्टेन कालं नीत्वा मृतस्तपःफलं भोक्ष्ये-इति मूर्खाणां प्रलापः । अतो महत्कष्टमनुभूयापि संसारसारभूतं स्त्रीसुखमेव भोक्तव्यम् । यतः,

> असारभूते संसारे सारभूता नितम्बिनी ।
> इति संचिन्त्य वै शंभुरर्धाङ्गे कामिनीं दधौ ॥ १ ॥' इति ।

एवं चिन्तयित्वा 'दैवादत्र समागतं विक्रमं याचित्वा सुखमनुभविष्यामि' इति निश्चित्य राजसमीपमागत्य 'महाराज चिरं जीव' इत्याशिषमवदत् । राजा तु तमासने समुपवेश्यावदत्— 'भो ब्रह्मन्कुतः समागतोऽसि' इति । ब्रह्मचारी "अहमत्रैव जगदम्बिकापरिचर्यां कुर्वंस्तिष्ठामि । नित्यमेवं परिचरतो मे पञ्चाशद्वर्षाणि व्यतीयुः । अहं तु ब्रह्मचारी । अद्य निशायां याममात्रावशिष्टायां देवता मां स्वप्ने प्राह— 'वत्स तवाहं प्रसन्नास्मि । त्वमिदानीं गृहस्थाश्रमं स्वीकृत्य पुत्रमुत्पाद्य पश्चान्मोक्षे मनो निधेहि । अन्यथा तव गतिर्नास्ति । तथा हि वदन्ति—

> ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
> अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः ॥ २ ॥ इति ।

किं च दानशौण्डो विक्रमस्तूर्णमत्रागमिष्यति । स तु तव मनोरथं पूरयिष्यति' इत्येवमादिश्यान्तरधात् । ततोऽहं प्रबुध्य भवन्तमागतं च दृष्ट्वा समागतोऽस्मि" इत्येवमनृतमवादीत् । तदाकर्ण्य राजा स्वमनस्यचिन्तयत् — 'किमेतत्सत्यं स्यात् ? । एवमेतत् । देवता स्वप्ने नाकथयत् । अयमेव कोऽप्यद्भुतं वदति । अस्त्वेवमेतत् । अयमार्त इव दृश्यते । सर्वथास्य मनोरथं पूरयिष्यामि' इति । एवं विचार्य तत्र नगरमेकं निर्माय तत्र तं संस्थाप्य शतं विलासिनीः पञ्चशतं तुरङ्गांश्चत्वारिंशद्रथांश्चतुःसहस्रं भटांश्च तस्मै ब्रह्मचारिणे ददौ । चण्डिकानगरमिति तस्य नगरस्य नाम च चकार । ततः परिपूर्णमनोरथो ब्रह्मचारी कृतोद्वाहमङ्गलस्तं राजानमाशीर्भिरभिववर्ष । राजापि निजनगरं जगाम" । इति सालभञ्जिका भोजाय कथां कथयामास । भोजस्तु तादृशमौदार्यमात्मन्यपश्यंस्तूष्णीं जगाम ॥

इति षष्ठमुपाख्यानम् ।

———(*)———

अथ सप्तममुपाख्यानम् ।

पुनरपि कदाचिद्भोजः शुभे मुहूर्ते समुचितसन्नाहः सिंहासनमारोढुं यावदुपचक्रमे तावदन्या सालभञ्जिकाब्रवीत् । भो राजंस्तथाविधं साहसमौदार्यं धैर्यं च यस्यास्ति स एवेदं सिंहासनमधिरोढुमर्हति । राजा प्राह— कीदृशं तत् ? । सालभञ्जिकाकथयत् — "भो राजन्विक्रमे राज्यं कुर्वति लोके दुर्जनः कोऽपि नासीत् । सर्वे जनाः सदाचारसंपन्ना ब्राह्मणा वेदशास्त्राभ्यासादिस्वधर्मचर्यापराः षट्कर्मनिरताश्च बभूवुः । सर्वेषामपि वर्णानां पापाद्भयम्, प्राणिषु दया, परमेश्वरे भक्तिः, देहे निर्ममता, नित्यानित्यवस्तुविचारः, हृदये चौदार्यमभूत् । एवं सर्वोऽपि लोकः पावनान्तःकरणः राज्ञः प्रसादात्सुखेनावर्तत । तदा च तत्र नगरे धनदो नाम कश्चिदूरुजः समभूत् । तस्य संपदां मर्यादा नास्ति । यानि वस्तूनि भुवने सुदुर्लभानि तानि तत्र सुलभानि । एवं सकलसंपत्समाश्रितस्य तस्यैवं बुद्धिरुदभूत् —'हन्तासारोऽयं संसारः । सर्वमपि वस्तुजातमनित्यम् । तथा च स्मर्यते —

गगननगरकल्पः संगमो वल्लभानां
जलदपटलतुल्यं यौवनं वा धनं वा ।
स्वजनसुतशरीरादीनि विद्युच्चलानि
क्षणिकमिति समस्तं विद्धि संसारवृत्तम् ॥ १ ॥इति ।

अतः संसारिणां धर्म एव शरणम् । ततः समुपार्जितं द्रव्यं सत्पात्रे दातव्यम्' इति । एवं बहुधा विचार्य श्रोत्रियानाहूय तत्सकाशाद्दानकाण्डोक्तानि विविधानि दानानि परिज्ञाय सर्वमेव निजधनं सत्पात्रे विनियुज्य पवित्रान्तःकरणः पुनरपि विचारयति स्म— 'अहो मयैतदनुष्ठितं दानव्रतादिकं तदा सफलं भवेत्, यदा द्वारवतीं गत्वा कृष्णं द्रक्ष्यामि' इति । ततो द्वारवतीं प्रति निर्गत्य समुद्रतीरं गत्वा कञ्चन नाविकमाहूय समुचितं वेतनं निर्णीय भिक्षुकयोगिनो वैदेशिकान्नावमारोप्य स्वयं चारुह्य तैः सह धर्ममेदुरास्तास्ताः कथाः कथयन्यावदागच्छत्तावत्समुद्रमध्ये समुदीर्णः कश्चित्पर्वतस्तेन दृष्टः । तत्र महानेको देवालयोऽदृश्यत । धनदस्तु देवालयं गत्वा भुवनेश्वरीं गन्धपुष्पाक्षतादिभिरुपचारैरभ्यर्च्य नमस्कृत्य च तस्या वामभागे छिन्नमस्तकं स्त्रीपुरुषयुगलं दृष्ट्वा पुरःस्थितभित्तिभागे लिखितान्यक्षराणि पपाठ — 'यदा कोऽपि परोपकारी परमैश्वर्यसंपन्नो द्वात्रिंशल्लक्षणोपेतः स्वकण्ठरुधिरेण भुवनेश्वरीं प्रीणयिष्यति तदेदं स्त्रीपुरुषयुगलं सजीवं भविष्यति' इति । एवं पठित्वा सविस्मयो धनदः पुनरपि नावमारुह्य द्वारवतीं गत्वा श्रीकृष्णं दृष्ट्वा प्रणम्यास्तौषीत् —

एकोऽपि कृष्णाय कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामो न पुनर्भवाय ॥ २ ॥ इति ।

एवं स्तुत्वा श्रीकृष्णं षोडशभिरुपचारैः संपूज्य यद्यदपूर्वं वस्तु समानीतं तत्सर्वं समर्प्य तत्र दिनत्रयमुषित्वा ततो निर्गत्य कतिपयैर्दिनैर्निजनगरमाजगाम । आगत्य च सर्वान्बान्धवान्कृष्णप्रसादेन सम्भाव्य किमप्यपूर्वं वस्तु गृहीत्वा प्रभाते विक्रमार्कं द्रष्टुं जगाम । गत्वा च सविनयं कृष्णप्रसादं दत्त्वा तदादिष्टमासनमध्यास्त । ततो राजा यात्राक्षेमं पृष्ट्वा किं किमपूर्वं द-

ष्टमिति वणिजमपृच्छत् । सोऽपि समुद्रमध्यदृष्टं भुवनेश्वरीदेवालयवृत्तान्तमवादीत् । तच्छ्रुत्वा समुपजातकुतूहलो राजा तेन सार्धं प्राप तदपूर्वं स्थानम् । तत्र च देवतावामभागे पतितं कबन्धयुगलमपश्यत् । अपाठीच्च तान्यक्षराणि । तदनन्तरं राजा भुवनेश्वरीं स्तुत्वा खड्गं कोशादाकृष्य यावत्कण्ठे चकार तावत्कबन्धयुगलं सशिरः सजीवं च समभूत् । देवतापि राज्ञो हस्तस्थितं खड्गमाकृष्याब्रवीत् — 'भो राजन्प्रसन्नास्मि । वरं वृणीष्व' इति । राजाब्रवीत् — 'भो देवि यदि प्रसन्नासि तर्ह्यस्य मिथुनस्य राज्यं देहि' इति । ततो देवी तथेति तस्य मिथुनस्य राज्यमदात् । राजापि धनदेन सह निजनगरमाजगाम" । इति कथां कथयित्वा सालभञ्जिका राजानमब्रवीत् — 'एवंविधं साहसादिकं त्वयि न दृश्यते' इति । तच्छ्रुत्वा राजा ततो निववृते ॥

इति सप्तममुपाख्यानम् ।

अथाष्टममुपाख्यानम् ।

भूयोऽपि भोजराजे यथापूर्वमागच्छति पाञ्चालिकान्या निषिध्य जगाद । 'भो भोज, इदं पुनरनन्यसाधारणं सिंहासनम् । यदि भवान्विक्रमाश्रितेन साहसादिना भूष्यते तदा त्वामनुजानामि' इति । ततो राजा किंचिदवनतमुखः 'सालभञ्जिके कथय तस्य साहसादिवृत्तान्तम्' इत्यपृच्छत् । सा ब्रवीत् — "राजन् शृणु । विक्रमो राजा भूमण्डले प्रवृत्ता बहुविधाः कथाश्चारमुखेन सम्यग्ज्ञात्वा वसुमतीं पर्यपालयत् । उक्तं च —

> गावो गन्धेन पश्यन्ति वेदैनैव द्विजातयः ।
> चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ १ ॥ इति ।

एवं विक्रमे राज्यं कुर्वति सत्येकदा चारा भूमण्डलं परिभ्रम्य राज्ञः सकाशमागत्य राज्ञा पृष्टा व्यजिज्ञपन् — 'देव काश्मीरदेशे महाद्रव्यसंपन्नः कश्चिद्वणिगस्ति । स च धर्मनिरतेन चेतसा पञ्चक्रोशविस्तारं तटाकमेकमखनत् । तन्मध्ये किञ्चिच्छिलमदृश्यत । तत्र च देवो नारायणः शयानो

दृष्टः। तस्य चायतनं कारयामास। परमुदकं न लेभे। ततो जलोद्गमनिमित्तं वरुणमुद्दिश्य ब्राह्मणैर्जपमकारयत्। तदपि वृथा बभूव। ततः खिन्नमानसे वणिजि तटाकतीरे समुपविश्य 'अहो केनाप्युपायेन जलं न लभ्यते। वृथा मे श्रमो जातः' इति चिन्तयति काप्यमानुषी वागधिगगनमेवमश्रूयत— "भो वणिक्पुत्र, किमर्थं चिन्ताव्याकुलोऽसि। महाराजलक्षणयुक्तस्य पुरुषस्य कण्ठरक्तेन यदा तडागं सिञ्चसि तदा विमलमुदकमाविर्भविष्यति नान्यथा' इति। तदाकर्ण्य स वणिक्तटाकतीरे महदन्नसत्रमकल्पयत्। तत्र च भोक्तुं स्वदेशवासिनो विदेशवासिनश्च समायान्ति। तदा च तत्र स्थिता वणिगादेशकारिणो भृत्यास्तेषां पुर एवं वदन्ति— 'यः कोऽपि स्वकण्ठरुधिरेण तटाकं सिञ्चति तस्य शतभारं सुवर्णं दीयते' इति। तद्वचः सर्वेऽपि शृण्वन्ति। परं तु न कोऽपि तत्साहसमङ्गीकरोति। एवंविधं महच्चित्रं दृष्टम्" इति। तच्छ्रुत्वा विक्रमः स्वयं तत्र गत्वा बिलशायिनं देवं प्रणम्यातिमनोहरमतिविशालं च तडागं दृष्ट्वा स्वमनस्यचिन्तयत्— 'यदि मम कण्ठरक्तेनेमं तडागं सिञ्चामि तर्हीदं जलैः संपूर्णं भवेत्। अनेन च सकललोकानामुपकारो भविष्यति। इदं तु मम शरीरं वर्षशतमपि स्थित्वा पश्चाद्विनाशमेव यास्यति। तथा चाहुः—

शतमपि शरदां वै जीवितं धारयित्वा
शयनमधिशयानः सर्वथा नाशमेति।
सुलभविपदि देहे सूरिलोकैकनिन्द्ये
न विदधति ममत्वं मुक्तिकान्तोत्सुकास्ते ॥ १ ॥ इति।

अतः सकललोकोपकारायेदं शरीरमवश्यमिदानीं मयोपयोक्तव्यम्' इति। एवं विचिन्त्य पुरःस्थितप्रासादगर्भगतबिलशयनस्य विष्णोः पूजां विधाय नमस्कृत्य— 'भो देव जलशायिन्द्वात्रिंशल्लक्षणसंपन्नस्य पुरुषस्य कण्ठरक्तं वाञ्छसि। अतो मम कण्ठरक्तेन तृप्तो भूत्वा तडागमेनं परिपूरय' इति संप्रार्थ्य यावत्कण्ठे खड्गमकरोत्तावत्स भगवान्खड्गमाक्षिप्य जगाद—'वीर तवाहं प्रसन्नोऽस्मि। अलमनेन साहसेन। वरं वृणीष्व' इति। राजावदत्—

'देव यदि मम प्रसन्नोऽसि तर्हीमं तडागं जलेन परिपूरय' इति । देवः प्राह— 'भो राजंस्त्वमस्मात्स्थानान्निर्गत्य तटाकतीरं प्राप्य यावत्परावृत्य पश्यसि तावज्जलैः परिपूर्णस्तडागो भविष्यति' इति । ततो राजा ससम्भ्रमं तटाकतीरमारुरोह । सरश्च जलैः परिपूर्णमदृश्यत । अनन्तरं परमानन्दभरितेन वणिजा स्तूयमानो राजा तेन समर्पितं शतभारसुवर्णं कस्मैचिद्विवाहार्थिने दरिद्राय ब्राह्मणाय दत्त्वा स्वनगरमगमत्" । इति सालभञ्जिकोक्तां कथां श्रुत्वा भोजराजः स्वस्मिंस्तादृशगुणानपश्यंस्तूष्णीं न्यवर्तत ॥

इत्यष्टममुपाख्यानम् ।

———(*)———

अथ नवममुपाख्यानम् ।

भूयोऽपि भोजमहीपाले सकौतुकसम्भ्रममागच्छति नवमी सालभञ्जिका सहासमिदमभाषत — 'भूपाल सिंहासनमारोढुं ससम्भ्रमोऽसि । दुर्लभं ते विक्रमार्कगतं साहसौदार्यादिकम् । तद्विरमास्मात्समुद्यमात्' इति । ततो राजा 'कथय गुणानन्यदुरवापान्विक्रमस्य' इत्यपृच्छत् । सालभञ्जिका प्राह— "विक्रमे राज्यं कुर्वति भट्टिः प्रधानमन्त्री । उपमन्त्री गोविन्दः । चन्द्रः सेनापतिः । तस्य पुत्रः कमलाकरो नाम । स तु प्रतिदिनमाकण्ठं भुञ्जानो वस्त्रभूषणताम्बूलादिना शरीरमलंकृत्य विषयसुखमनुभवन्नासीत् । एकदा दुर्वृत्तं तं सुतमाहूय पिता जगाद— 'भोः कमलाकर ब्राह्मणजन्म प्राप्यापि त्वमेवं दुर्वृत्तोऽसि । स्वकर्मवशादयमात्मा नानायोनिषु जन्म प्राप्नोति । कदाचित्सत्कर्मवशान्मनुष्ययोनिं प्रविशति । तत्रापि ब्राह्मणकुले जन्म महता पुण्येन लभ्यते । तल्लब्ध्वापि त्वं दुर्वृत्तोऽसि । सर्वदा बहिरेव सञ्चरसि । भोजनकाले परं भवनमागच्छसि । अनुचितमिदं न जानासि । किं च तवायं विद्याभ्यासकालः । इदानीं यदि विद्यां नाभ्यस्यसि तर्ह्युत्तरत्र तव महान्सन्तापो भविष्यति । तथा चोक्तम् —

ये बालभावे न पठन्ति विद्यां कामातुरा यौवननष्टचित्ताः ।
ते वृद्धभावे परिभूयमाना दहन्ति गात्रं शिशिरे यथाब्जम् ॥ १ ॥

येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपाः पशवश्चरन्ति ॥ २ ॥ इति ।
किं च पुरुषस्य न विद्यायाः परं भूषणं धनं चास्ति । तथा च वदन्ति —

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ ३ ॥ इति ।

किं च, किं कुलेन विशालेन विद्याहीनस्य देहिनः ।
अकुलीनोऽपि विद्यावान्देवैरपि हि पूज्यते ॥ ४ ॥

अन्यच्च, वत्स यावदहं जीवामि तावत्त्वया विद्याभ्यसनीया । अन्यदा तु सा तव दुष्प्रापैव । अभ्यस्ता तु सा कल्पलतेव सर्वं साधयेत् । तथा च श्रूयते —

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।
कीर्तिं च दिक्षु वितनोति तनोति वित्तं
किं वा न साधयति कल्पलतेव विद्या ॥ ५ ॥ इति' ।

एवं पितृवचनं श्रुत्वा पश्चात्तापपीडितः कमलाकरः 'यदाहं सर्वज्ञो भविष्यामि तदैव पितृमुखं द्रक्ष्यामि' इति प्रतिज्ञाय काश्मीरदेशं गत्वा तत्र चन्द्रमौलिभट्टनामानमुपाध्यायमुपसृत्य सविनयं प्रणम्य 'भोः स्वामिन्मूर्खोऽहं भवतः सकाशाद्विद्याभ्यासं कर्तुमागतोऽस्मि । प्रसीद । यथाहममितज्ञो भवेयं तथा मामध्यापयितुमर्हसि' इति वदन् पुनः पुनरवन्दत । उपाध्यायोऽप्येनमङ्गीचकार । कमलाकरश्च गुरुं शुश्रूषमाणः पपाठ । तथा च स्मर्यते —

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथ वा विद्यया विद्या चतुर्थं नोपलभ्यते ॥ ६ ॥ इति ।

एवमप्रमादं शुश्रूषया विद्यामभ्यस्यतस्तस्य महान्कालोऽतिचक्राम । तत एकदोपाध्यायस्तस्योपरि कृपातरङ्गितान्तरङ्गः सिद्धसारस्वतमन्त्रमुपादिदेश । तेन चोपदेशेन सर्वज्ञो भूत्वा कमलाकरः कृतार्थमात्मानं मत्वा सप्रदक्षिणप्र-

णाममुपाध्यायस्यानुज्ञां गृहीत्वा पितृदर्शनव्याकुलः स्वनगरं प्रत्यागच्छन्मार्गवशात्काञ्चीनगरमगमत् । तत्र कानन्यसाधारणरूपसंपन्ना नरमोहिनी नाम काचिद्वनितासीत् । यो हि पुरुषस्तां पश्येत्स सद्य एव कामज्वरपीडितः परमुन्मादावस्थां प्राप्नुयात् । यः पुनरनया विहृत्य तस्मिन्नेव तल्पे निद्रामनुभवेत्तस्य रुधिरं विन्ध्याचलनिवासी कश्चिद्राक्षसो निरवशेषं पीत्वा तं मारयेत् । कमलाकरोऽप्येतदाश्चर्यं तत्र दृष्ट्वा निजनगरमाजगाम । आगतं च कुमारममितज्ञं ज्ञात्वा जनकः परं ननन्द । परेद्युरेष कमलाकरः पित्रा सह राजानं द्रष्टुं गत्वा—

पाण्डुपङ्कजसंलीना मधुपालीर्मनोहराः ।
यो बिभर्ति त्रिधेरात्मा स तनोतु सुमङ्गलम् ॥ ७ ॥

इति विक्रमायाशिषमवदत् । आस्थाय च समुचितमासनमात्मनः कलावैदग्ध्यमदर्शयत् । राजापि परं सन्तुष्टस्तं वस्त्राभरणादिना सम्मान्य पप्रच्छ—‘भोः कमलाकर कुत्र कुत्र व्यचरः ? किं किमद्भुतमद्राक्षीः’ इति । कमलाकरः ‘अहं बहून्देशान्व्यचरम् । प्रत्यागच्छंश्च काञ्चीनगरेऽद्भुतमेकमपश्यम्’ इति प्राह । ततो राजनि ‘तत्किम् ? कथय’ इति पृच्छति स तदद्भुतमाचचक्षे । अनन्तरं सहैव तेन काञ्चीनगरमागत्य नरमोहिन्या निरतिशयं रूपमवलोक्य विस्मितस्तस्या गृहं प्रविवेश । सापि तौ राजार्होपचारेण तोषयित्वा सविनयमेवं राजानं व्यजिज्ञपत्—‘देव धन्यास्मि । पवित्रमभूदिदं भवनम्, यतो भवतश्चरणकमलधूलिभूषितमभूत् । अद्य भोजनपरिग्रहेण जनमिमं कृतार्थयतु देवः’ इति । राजा ‘इदानीमेवाहं भुक्त्वा समागतोऽस्मि । श्रुतिसुखेन भाषितेनैव ते तुष्टोऽस्मि’ इति प्राह । ततस्तया दत्तां ताम्बूलवीटिकां जग्राह । इत्थं रात्रौ प्रहरोऽतीयाय । नरमोहिनी तु सुष्वाप । द्वितीये प्रहरे राक्षसः समागत्य नरमोहिनीमेकाकिनीं मञ्चे सुप्तां दृष्ट्वा निर्जगाम । तदा राजा तं केशे गृहीत्वा कृपाणेन कण्ठमच्छिनत् । तत्कोलाहलं श्रुत्वा नरमोहिनी प्रबुध्य हतं राक्षसं विलोक्य परं सन्तुष्टा राजानमस्तौषीत्—‘देव भवत्प्रसादादहं निर्भया जातास्मि । अ-

यत्प्रभृति मम राक्षसोपद्रवो निवृत्तः । अस्मादुपकारात्कथमहमुत्तीर्णा भवेयम् । इतः प्रभृति यदाज्ञापयति भवांस्तदाचरितुमहमायत्तास्मि' इति । राजा 'यदि मयोक्तं करिष्यसि तर्हीमं कमलाकरं भजस्व' इत्याह । ततः सा नरमोहिनी कमलाकरमभजत् । विक्रमोऽप्युज्जयिनीमाजगाम" । इति साल्भञ्जिकोक्तां कथां श्रुत्वा भोजस्तूष्णीं निववृते ॥

इति नवममुपाख्यानम् ।

———(*)———

अथ दशममुपाख्यानम् ।

भूयोऽपि कदाचिद्भोजभूपालो यावत्सिंहासनमारुरुक्षत्तावदपरा पाञ्चालिका निषिध्य 'भो राजन्विक्रमस्येवौदार्यादयो गुणा यदि त्वयि विद्यन्ते तदास्मिन्नासने समुपविश' इत्याह । ततो राजनि 'कथय तस्यौदार्यादिवृत्तान्तम्' इति पृच्छति पाञ्चालिका प्राह— "भो राजञ्श्रूयताम् । विक्रमे सिंहासनमिदमास्थाय विश्वम्भरां पालयति योगी कश्चिदुज्जयिनीं प्रत्यागच्छत् । स च वेदवेदाङ्गादिसकलशास्त्रविचक्षणः । किं बहुना । तत्सदृशो नान्योऽस्ति भूतले । स साक्षात्सर्वज्ञ एव । एकदा विक्रमस्तस्य प्रसिद्धिं निशम्य तमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास । स च तदन्तिकं गत्वा नमस्कृत्याब्रवीत्— 'भोः स्वामिन्राजा विक्रमो भवन्तं द्रष्टुमिच्छति । तदागच्छतु भवान्' इति । योगी प्राह— 'राजदर्शनेन किमस्माकमस्ति प्रयोजनम् । पश्य—

भुञ्जीमहि वयं भिक्षामाशा वासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ १ ॥' इति ।

पुरोहितस्तदाकर्ण्य राजसमीपमागत्य न्यवेदयत् । ततो राजा स्वयमेव तत्सन्दर्शनार्थमागत्य प्रणम्य तदाज्ञयोपविष्टस्तेन सह नानाविधा अध्यात्मकथाः कुर्वन्नेकदा तमपृच्छत्— 'भोः स्वामिंस्तव कति वर्षाणि जातानि' इति । योगी प्राह— 'किमेवं पृच्छसि । नीतिविदा पुरुषेण स्वस्यायुर्न कथनीयमिति किं नाश्रौषीः ? । अन्यच्च, यस्तु योगीश्वरः स कालं वञ्चयित्वा

सुचिरं जीवेत् । आस्तामेतत् । यदि त्वं साधयितुं प्रभवसि तर्हि मन्त्रमेकमुपदिशामि’ इति । राजा ‘किं तेन लभ्यते ?’ । योगी ‘अनेन त्वं जरामरणवर्जितो भविष्यसि’ । राजा ‘तदुपदिशतु स्वामी’ । ततो योगीश्वरः ‘अमुं मन्त्रं वर्षमेकं ब्रह्मचर्येण जप्त्वा दूर्वाङ्कुरैर्होमं विधेहि । ततः पूर्णाहुतिसमये होमकुण्डात्कश्चित्पुरुषः फलहस्तो निर्गत्य फलं दास्यति । तदुपभुज्य जरामरणवर्जितो भविष्यसि’ इत्युक्त्वा राज्ञे मन्त्रमेकमुपदिश्य स मुनिर्यथेच्छं जगाम । राजाप्युज्जयिनीं समया हायनमेकं ब्रह्मचर्येण मन्त्रं जप्त्वा दूर्वादलैर्हुत्वा पूर्णाहुतिमकरोत् । तदा होमकुण्डात्कश्चित्पुरुषो निर्गत्य दिव्यमेकं फलं राज्ञे ददौ । राजापि तत्फलं गृहीत्वा कृतकृत्यः पुरं प्रविश्य राजवीथ्यां समागच्छन्कुष्ठव्याधिना विशीर्णसर्वावयवं कञ्चन ब्राह्मणमद्राक्षीत् । स च राजानमुपसृत्य कृपणमेवमवादीत्— ‘देव राजा नाम सर्वेषां लोकानां मातापितृवदवगन्तव्यः । तथा च वदन्ति—

राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च राजा चार्तिहरो गुरुः ॥ २ ॥ इति ।

अतोऽनेन व्याधिना विशीर्णं ममैतच्छरीरं यथा निरामयं सदनुष्ठानयोग्यं भवेत्तथा विधातुमर्हसि’ इति । ततो राजा सर्वधर्मानुष्ठानसाधनशरीरारोग्यार्थं तस्मै तत्फलं ददौ । ततो ब्राह्मणः परमतुष्यत् । राजा स्वभवनं जगाम ।” इति कथां दशमसालभञ्जिकोक्तां श्रुत्वा राजा तूष्णीं बभूव ॥

इति दशममुपाख्यानम् ।

अथैकादशमुपाख्यानम् ।

पुनरपि भोजराजः सिंहासने समुपवेष्टुं यावदाजगाम तावदन्या पाञ्चालिका पुरेव निवार्य राजानमब्रवीत्— ‘महीपाल श्रूयतां विक्रमस्यौदार्यं प्रथमम् । पश्चादिदमारुह्यताम्’ इति । ततो राजनि ‘कथय तस्यौदार्यादिकम् । शुश्रूषते मे श्रोत्रम्’ इति पृच्छति पाञ्चालिका प्राह— ‘विक्रमे राज्यं कुर्वति सति भूमण्डले दुर्जनः पिशुनस्तस्करः पापकर्मा वा न कोऽ-

मपासीत् । किं च यस्य राज्ञः सर्वदा राज्यचिन्ता मन्त्रविचारश्च स केवलं चिन्तापरस्त्वाहिवारात्रं निद्रामपि न याति । उक्तं च—

अर्थातुराणां न गुरुर्न बन्धुः
कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न रुचिर्न कालः ॥ १ ॥ इति ।

एष पुनर्विक्रमो नैवमभूत् । सर्वान्प्रत्यर्थिभूभुजः स्वपादपद्मोपजीविनो विधाय निजाज्ञापरतन्त्रं निश्चिन्तं च राज्यमकरोत् । एकदा मन्त्रिषु राज्यभारं निधाय स्वयं योगिवेषेण देशान्तरं प्रति निर्जगाम । निर्गत्य च यत्र स्वचित्तस्य सुखमभूत्तत्र कतिचिद्दिनान्यतिष्ठत् । यत्र चाश्चर्यं दृष्टं तत्रापि कञ्चित्कालमनयत् । एवं पर्यटतस्तस्यैकदा कुत्रापि महारण्ये सूर्योऽस्तं जगाम । ततश्च किञ्चन वृक्षमूलमाश्रित्योपविष्टः । तस्योपरि वृद्धश्चिरजीवी नाम कश्चित्पक्षिराजस्तस्थौ । तस्य पुत्राः पौत्राश्च प्रातर्देशान्तरं गत्वा स्वोदरमापूर्य सायं प्रत्येकमेकैकं फलं गृहीत्वा तस्मै चिरजीविने प्रतिदिनं दिशन्तः सुखमूषुः । साधु चेदमुच्यते । यतः,

वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥ २ ॥

तस्यां च रात्रौ चिरजीवी सुखोपविष्टः सन्पक्षिणोऽपृच्छत् । 'भोः पुत्राः परितः पर्यटन्तो भवन्तः किमद्भुतमपश्यत' इति । तत्र पटुचञ्चुर्नाम कश्चित्प्राह । 'नाहं किमप्यद्भुतमद्राक्षम् । अपि तु परेद्युर्मम महद्दुःखं भविष्यति' इति । चिरजीवी— किं तत् ? पटुचञ्चुः— इदानीं कथनमात्रेण किं तदुपशाम्यति ? । चिरजीवी— भोः पुत्र यः सुहृदे स्वदुःखं निवेदयति स सुखी भवति । तदाकर्ण्य पटुचञ्चुरात्मदुःखमकथयत् — 'तात श्रूयताम् । अस्त्युत्तरदेशे शैवालको नाम पर्वतः । तत्समीपे पलाशनगरं नामाग्रहारोऽस्ति । तत्र च पर्वते कश्चिद्राक्षसः प्रतिदिनं नगरमार्गागताञ्जनान्बलात्पर्वतं नीत्वा भक्षयन्नासीत् । एकदा तु जनाः 'भो राक्षस यथेच्छं

त्वन्मुखागतं पुरुषं मा भक्षय । वयं तुभ्यमेकैकं पुरुषं प्रतिदिनमाहारार्थं दास्यामः’ इत्यभ्ययाचन्त । सोऽप्येतदङ्गीचकार । अनन्तरं महाजनाः प्रतिदिनं गृहक्रमेणैकैकं पुरुषं तस्मै प्रायच्छन् । एवं महानतिचक्राम कालः । अद्य मम पूर्वजन्मनिमित्तभूतस्य ब्राह्मणस्य बलिवासरः संप्राप्तः । तस्य त्वेक एव पुत्रः । यदि तं दद्यात्तदा सन्ततिविच्छेदो भवेत् । यद्यात्मानमेव प्रयच्छति तदा भार्यात्यन्तवृद्धा विधवा भवेत् । वैधव्यं पुनर्महद्दुःखमबलानाम् । तथा च रामायणे—

पतिहीना तु या नारी कामं भवतु पुत्रिणी ।
धनधान्यैः सुपूर्णापि विधवेत्युच्यते बुधैः ॥ ३ ॥ इति ।

तदेतद्दुःखं मयि संक्रामति’ इति । तस्य वचनं श्रुत्वा तत्रान्ये पतङ्गा निजगदुः— सखे स्वजनदुःखेन तव दुःखं युक्तमेव । तथा च श्रूयते—

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुद्गतं तदभवद्दृष्ट्वा स्वमित्रापदं
युक्तं तेन जलेन शाम्यति सतां वृत्तिः पुनस्त्वीदृशी ॥ ४ ॥ इति ।

एवं पक्षिणां संलापं श्रुत्वा विक्रमस्तं पर्वतमयासीत् । तत्र च वध्यशिलां निरीक्ष्य तत्समीपस्थितसरोवरे स्नात्वा वध्यशिलायामुपविवेश । तत्रान्तरे राक्षसोऽपि समागत्य प्रहसितवदनमासीनं राजानं दृष्ट्वा विस्मितः पप्रच्छ । ‘भो महासत्त्व को भवान्? कुतः समाजगाम? । यः पुनरत्र शिलायामुपविशति स मामदृष्ट्वैव भयान्म्रियेत । त्वं पुनर्महाधैर्यसंपन्नः स्मेराननो दृश्यसे । अन्यच्च, यस्य मरणकालः संनिधत्ते स ग्लानिं भजते । त्वं पुनरधिकां कान्तिं प्राप्य हससि’ इति । राजा ‘सखे तव किमनेन विचारेण? मया परार्थमेव शरीरं दीयते । तदात्मनः समीहितं कुरु’ इत्यवदत् । निशाचरस्तु राज्ञः सौजन्यमालोक्य ‘भो महापुरुष यतः परार्थं शरीरं प्रयच्छसि ततस्तवैव जीवितं श्लाघ्यम् । अथवा भवादृशां परोपकारिणां नैतच्चित्रम् । उक्तं च—

किमत्र चित्रं यत्सन्तः परानुग्रहतत्पराः ।
न हि स्वदेहशैत्यार्थं जायन्ते चन्दनद्रुमाः ॥ ९ ॥ इति ।

अतो वयस्य तवाहं तुष्टोऽस्मि । वरं वृणीष्व' इत्यब्रवीत् । राजा—'यदि प्रसन्नोऽसि तर्ह्यद्यप्रभृति मनुष्यभक्षणं परित्यज । अन्यत्यान्विप्रान्परित्रायस्व । आत्मानमिव तान्पश्य' इत्याह । तच्छ्रुत्वा सोऽपि राक्षसस्तदाप्रभृति प्राणिवधं परितत्याज । राजापि कृतार्थो भूसुरान्प्रणम्य तैरभिनन्दितः स्वनगरमगमत्" । इतीमां कथां सालभञ्जिकाकथितामाकर्ण्य त्रपावनतवदनो भोजो निजान्तःपुरमयासीत् ॥

इत्येकादशमुपाख्यानम् ।

———(*)———

अथ द्वादशमुपाख्यानम् ।

भूयोऽप्येकदा भोजे सिंहासनमारोढुमायात्यपरा सालभञ्जिका जगाद । 'एतत्सिंहासनं विक्रमस्यौदार्यं प्रथममाकर्ण्यानन्तरमारोढव्यम्' इति । ततो भोजे 'कथय तस्यौदार्यम्' इति पृच्छति साब्रवीत्—"विक्रमे राज्यं कुर्वति तस्य नगरे भद्रसेनो नाम वणिगासीत् । तस्य पुरन्दरो नाम पुत्रोऽभूत् । तस्य भद्रसेनस्य संपदां परिच्छेदो नादृश्यत । परं तु व्ययशीलो नासीत् । ततश्चिराद्भद्रसेने मृते पुरन्दरः पितुः सर्वस्वं प्राप्य कालोचितं त्यागं कर्तुमारभत । अथैवंविधमेनं धनदो नाम सुहृदभाषत—'सखे पुरन्दर वणिक्पुत्रो भूत्वापि महाक्षत्रियकुमार इव व्ययं करोषि । एतद्वणिक्कुलसम्भवस्य तव नोचितम् । वणिक्पुत्रेणैकाकिनापि द्रव्यसङ्ग्रहः कर्तव्यः । वराटिकाया अपि व्ययो न कर्तव्यः । उपार्जितं द्रव्यं कस्यां चिदापद्युपकुर्यात्' इति । एतद्धनदवचनं श्रुत्वा पुरन्दरः प्राह—'सखे धनद समुपार्जितं वित्तं कस्यां चिदापद्युपयोगाय भवतीति यो वदति स विचारशून्यः । यदा त्वापदः समायान्ति तदोपार्जितं धनमपि नश्यति । अतो विवेकिना पुरुषेणोचितो व्ययः कार्य एव' इति । एतच्छ्रुत्वा निरुत्तरीभूतो धनदस्तूष्णीमासीत् । ततः पुरन्दरः पैतृकं सर्वमपि स्वं सत्पात्रेभ्यो विनियुक्तवान् । ततो वित्तहीनं

पुरन्दरं बन्धुमित्रादयो न मानयन्ति स्म । तेन सह गोष्ठीमपि नाकुर्वन्
तदा पुरन्दरः स्वमनस्यचिन्तयत् — ‘यावद्धस्ते धनमासीत्तावदेव सर्वे
त्रादयो मामसेवन्त । इदानीं मया सह गोष्ठीमपि न कुर्वन्ति । नीतिरि
सत्या ‘यस्यार्थास्तस्य मित्राणि’ इति । तथा च—

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥ १ ॥’ इति ।

एवं विचिन्त्य निर्विण्णः—

दारिद्र्याय नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
सर्वं पश्यामि देवेश न मां पश्यति कश्चन ॥ २ ॥

इति वदन्स्वनगरान्निर्गत्य देशाद्देशमटन्हिमाचलसमीपस्थं नगरमेकमगमत्
तत्र रात्रौ कस्यचिद्गृहस्य बहिर्वेदिकायां सुष्वाप । अर्धरात्रसमये च नाति
रस्थवेणुवनमध्ये रुदन्त्याः कस्याश्चिदबलाया हाहाकारं श्रुत्वा ‘किमेतत्’
इति पुरन्दरे दत्तकर्णे सति ‘भो महाजना मां परित्रायध्वम् । एष को
राक्षसो मां मारयति’ इति वर्णावलिरश्रूयत । ततः प्रभातसमये सविस्म
पुरन्दरस्तन्नगरवासिनो जनान् ‘किमेतत्’ इत्यपृच्छत् । ततः ‘अत्र वेणुव
मध्ये प्रतिदिनमेवं रात्रौ रोदनध्वनिः श्रूयते । परं तु कोऽपि भयान्न निर्गच्छ
ति न विचारयति च’ इति ब्रुवद्भिर्जनैर्विदितवृत्तान्तः पुरन्दरस्ततो नि
ष्क्रम्य स्वेच्छया कञ्चित्कालं पर्यटन्स्वनगरमागत्य राजानमद्राक्षीत् । रा
‘वत्स पुरन्दर देशान्पर्यटन्बहूनि दिवसान्यनयः । अतिमहता कालेन
येन किं किमद्भुतमद्राक्षीः ? किं किमश्रौषीः’ इत्यपृच्छत् । पुरन्दरस्तु
णुवनवृत्तान्तमकथयत् । अनन्तरं राजा तेन सह तन्नगरमवगाह्य निशीथे
मध्येवनमाक्रन्दध्वनिमाकर्ण्य कृपाणपाणिः स्वयमेक एव तदरण्यं विवेश ।
तत्र चातिकरुणं रुदन्तीमनाथां मानुषीं पीडयन्तमेकं राक्षसमपश्यत् ।
अवोच — ‘रे पापिष्ठ स्त्रियमनाथां किमेवं मारयसि ?’ इति । राक्षसः
त्याह — तव किमनेन विचारेण । यथागतमपसर । अन्यथा त्वमपि वृथैव
मरिष्यसि’ इति । तत उभयोर्विवादो महानभूत् । ततो राजा कृपाणमुत्थाप्य

ण्य राक्षसं जघान । हते च तस्मिंश्छिन्नमूल इव महीरुहे निपतिते प्रहृष्टा सा वनिता ससम्भ्रमं समागत्य राज्ञः पादयोर्निपत्य बभाण । 'स्वामिंस्तव प्रसादान्मम शापावसानमभूत् । महतो दुःखसागरादुद्धृतास्मि' इति । ततो राजा 'का त्वम्? कुतस्त्वामेष पापीयानपीडयत्? कियता च कालेनैवंविधामवस्थामनुभवसि?' इत्यपृच्छत् । वनिता "देव विज्ञापयामि । अस्मिन्नगरे महाधनसंपन्नः कश्चिद्ब्राह्मणोऽभूत् । तस्य भार्याहम् । व्यभिचारिणी । मम तस्मिन्प्रीतिलेशोऽपि नासीत् । तस्य तु मयि महाननुरागोऽवर्तत । स च यावज्जीवं कामसन्तप्तः पतिर्देहावसानसमये मामशपत् । 'अयि दुराचारे त्वमेव मम मृत्योर्मूलमसि । यदेवं मम मनोरथं वितथमकार्षीः । अनुभव तदद्यप्रभृति तत्फलम् । 'वेणुवनवासी कश्चिद्राक्षसः अतिभयङ्कररूपो रात्रौ त्वामनिच्छन्तीमपि बलात्प्रतिदिनं पीडयिष्यति' इति । एवं शप्तया मया सपादपतनमभियाचितो 'यदा महोपकारी महाधैर्यसंपन्नः कश्चिन्महापुरुषः समागत्य तं राक्षसं मारयिष्यति तदा तव शापावसानं भविष्यति' इत्युक्त्वा तनुं तत्याज । तदाप्रभृति भवदागमनमभिकाङ्क्षन्ती दैवादद्य भवताहं शापान्मोचिता । अद्य मम प्राणा निर्गमिष्यन्ति । मम नवघटपरिमितं सुवर्णमस्ति । त्वं तद्गृहाण" इति । एवं विज्ञाप्य धनस्थानं राज्ञे निवेद्य सा प्राणांस्तत्याज । राजा च तद्धनं पुरन्दराय वणिजे समर्प्य तेन सहोज्जयिनीमवाप ।" इति सालभञ्जिकया कथितां कथां श्रुत्वा भोजस्तादृशमौदार्यादिकमात्मन्यपश्यंस्तूष्णीं निववृते ॥

इति द्वादशमुपाख्यानम् ।

———(*)———

अथ त्रयोदशमुपाख्यानम् ।

पुनरपि सिंहासनसमारुरुक्षया समागतं भोजभूपतिं प्रतिमापरा जगाद— "प्रथमं विक्रमगुणानाकर्णय । ततो यदि रोचते तर्ह्यस्मिन्समुपविश । एकदा विक्रमार्को मन्त्रिषु राज्यभारं निधाय स्वयं भूमिकान्तरतिरोहितः पृथिवीपर्यटनाय निश्चक्राम । निष्क्रम्य च प्रतिनगरं त्रीणि त्रीणि दिवसानि

नयन्नगरमेकमगमत् । तन्नगरसमीपस्थितनदीतटे देवालये सर्वेऽपि महाजनाः कस्मादपि पौराणिकात्पुराणं शृण्वन्तीति निशम्य नद्यां स्नात्वा देवालयं गत्वा देवं नमस्कृत्य महाजनसमीपे स्वयमुपविश्य पुराणश्लोकानेतानशृणोत्—

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥ १ ॥
श्रूयतां धर्मसर्वस्वं यदुक्तं शास्त्रकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ २ ॥
एकतः क्रतवः सर्वे समग्रवरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥ ३ ॥ इति ।

एवं पुराणश्रवणसमये कश्चिद्ब्राह्मणः पत्न्या सह नदीमुत्तितीर्षुर्नदीमध्यमहामहापूरेण नीयमानो हाहाकारं कुर्वन्नदीतटे पुराणश्रवणतत्परान्महाजनानुद्दिश्यैवमवादीत्—'भो भो महाजनास्त्रायध्वम् । वृद्धः सपत्नीको ब्राह्मणोऽहं नदीप्रवाहे मुहुर्मुहुर्निमज्जन्नेष जीवितं त्यक्ष्यामि । यः कोऽपि सत्त्वाधिको धार्मिको मम सभार्यस्य प्राणान्ददातु' इति । एवं प्रार्थयमानस्य तस्य दीनध्वनिं श्रुत्वा सर्वेऽपि जनाः सदयमपश्यन् । न कोऽपि तस्याभयं दातुं प्रबभूव । प्रवाहात्तमुत्कूलयितुं कोऽपि न शशाक । ततो विक्रमो राजा 'मा भैषीः' इति धीरमुद्घोष्य नदीमध्यं प्रविश्य पत्न्या सह तं ब्राह्मणं महापूरादाकृष्य तटमानिनाय । राजंस्तस्य कियानानन्दः स्यादिति भवानेव विचारयतु । ततो ब्राह्मणोऽपि स्वस्थः सन्राजानमवदत्—'भो महापुरुष ममैतच्छरीरं पुरा पितृभ्यामजनिष्ट । ततोऽस्य गायत्र्या द्वितीयं जन्म । इदानीं भवतस्तृतीयं जन्म प्राप्तम् । अतः प्राणदानान्महोपकारिणस्तवाहं किमुपकरिष्यामि । यदि विरमामि मम जीवितं मुधैव स्यात् । अतो यथाशक्त्युपकरोमि । प्रतिगृहाण । गोदावर्युदकमध्ये द्वादश वर्षाणि गायत्र्याख्यमन्त्रमजपम् । तत्पुण्यं तुभ्यं दीयते । अन्यच्च कृच्छ्रचान्द्रायणादिना संपादितं सुकृतमस्ति । तदपि गृहाण' इत्युक्त्वा राज्ञे तत्समग्रं पुण्यं समर्प्याशिषं प्रयुज्य पत्न्या सह ब्राह्मणो निजस्थानं जगाम । अस्मिन्नेव समये

भीषणः कोऽपि ब्रह्मराक्षसो राजसमीपमाजगाम । ब्राह्मणाः सम्भ्रान्तास्तमपश्यन् । राजापि तं दृष्ट्वापृच्छत् — 'भो महापुरुष कस्त्वं कुतः समागच्छसि ?' इति । राक्षसः 'अहमत्रैव नगरे दुष्प्रतिग्रहजीवी दुर्याचनापरश्च कश्चिद्ब्राह्मण आसम् । तदा विद्यागर्वात्सर्वान्वृद्धानदूषयम् । तत्पापवशादस्मिन्नश्वत्थपादपे ब्रह्मराक्षसो भूत्वा नियुतं वर्षाणि तिष्ठामि । अद्य भवतोरुभयोर्गोष्ठीमाकर्ण्य समागतोऽस्मि । यतो निर्विशेषं सर्वेषामुपकरोषि तन्ममाप्युपकर्तुमर्हसि' इति । राजा — किं वाञ्छसि ? । राक्षसः 'इदानीं ब्राह्मणेन यत्पुण्यं तुभ्यं दत्तं तन्मह्यं दीयताम् । तेन पुण्येनाहमस्माद्दोषादुत्तीर्णो भविष्यामि' इति तत्पुण्यमयाचत । राजा तदानीमेव तत्पुण्यं निर्विशङ्कं ददौ । सोऽपि तेन पुण्येन तस्मात्पापकर्मणो मुक्तो दिव्यरूपधरः सन्राजानं प्रशस्य दिवं जगाम । राजापि तत्रत्यान्महाजनानापृच्छ्य स्वनगरमगमत् ।" इति सालभञ्जिका कथां कथयामास । भोजोऽपि तामाकर्ण्य विफलमनोरथो जगाम ॥

इति त्रयोदशमुपाख्यानम् ।

———(*)———

अथ चतुर्दशमुपाख्यानम् ।

भूयोऽपि कदाचन भोजे सिंहासनमारोढुमभिलषति पाञ्चालिकापरा व्याजहार । वामन इव वृक्षाग्रस्थितं फलं सिंहासनमिदमधिगन्तुमभिलषसि । आकर्णय विक्रमस्यौदार्यम् । "एकदा विक्रमो राजा पृथिव्यां कस्मिन्स्थाने किमाश्चर्यमस्ति ? का वार्ता ? किं तीर्थम् ? को वा देवतावासोऽस्तीति विलोकयितुं तपस्विवेषेण परिभ्रमन्नगरमेकमगमत् ? । तत्समीपे तपोवनमेकमद्राक्षीत् । तस्मिन्नेका नदी प्रवहति स्म । तत्र जगदम्बिकामहाप्रासादोऽभूत् । राजापि तत्र नदीजले स्नात्वा देवतां सप्रदक्षिणं प्रणम्य ततो निर्जगाम । तत्रान्तरेऽवधूतवल्लभो नाम कश्चिद्योगी तत्रागत्य कृतप्रणामं राजानमन्वयुङ्क्त । कुत आगतो भवान् ? । राजा 'अध्वनीनोऽहं कोऽपि तीर्थयात्राशीलः' इत्याह । योगी 'न त्वं विक्रमार्कः ? एकदा त्वामुज्जयिन्यामप-

श्यम् । अतोऽहं त्वां जानामि । किमर्थमागतोऽसि' इत्यपृच्छत् । राजाऽब्रवीत् — स्वामिन्पृथ्वीपर्यटने महत्युत्कण्ठा समभूत् । तेन हि सर्वमाश्चर्यं विलोक्यते । भवादृशानां महतां सन्दर्शनमपि भविष्यति' इति । अवधूतवासाः अपृच्छत् — 'राजंस्तत्तादृशं राज्यं परित्यज्य कथं देशान्तरं परिभ्रमसि' इति । 'अहं सर्वमपि राज्यभारं मन्त्रिहस्ते निधाय समागच्छम्' इति राजा प्रत्यब्रवीत् । अवधूतवासाः 'अये त्वया नीतिशास्त्रविरोधः क्रियते । तथा हि नीतिविदः—

नियोगिहस्तार्पितराज्यभारा-
स्तिष्ठन्ति ये स्वैरविहारधीराः ।
बिडालबृन्दार्पितदुग्धभाण्डाः
स्वपन्ति ते मूढधियः क्षितीन्द्राः ॥ १ ॥ इति ।

अन्यच्च, राज्यं स्ववशंवदमभूदिति नोपेक्षणीयम् । स्वायत्तमपि पुनः सुदृढं कर्तव्यम्' इति । तच्छ्रुत्वा राजा बभाण— "भगवन्सर्वमेतत्पौरुषं निरर्थकम् । दैवमेव सर्वस्य मूलम् । सुदृढेऽपि राज्ये सत्यामपि साधनसमृद्धौ संपन्नेपि पौरुषे दैववैमुख्यान्नरः परिभूयते । तथा च वदन्ति नीतिविदः—

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विवर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥ २ ॥ इति ।"

एवं राज्ञो वचनं श्रुत्वा प्रहृष्टो योगी तस्मै काश्मीरलिङ्गमेकं दत्त्वाभाषत— 'भो राजन्नेतत्काश्मीरलिङ्गं चिन्तामणिरिव चिन्तितानि वस्तूनि ददाति । तस्मादेतत्साधु पूजय' इति । राजा 'बाढम्' इत्युक्त्वा तं प्रणम्य तल्लिङ्गमादायागच्छन् नगरमार्गे कञ्चन ब्राह्मणमपश्यत् । स च राजानमुद्दिश्य,

पातु वो गिरिजामाता यस्तु द्वादशलोचनः ।
पातु वो गिरिजामाता द्वादशार्धार्धलोचनः ॥ ३ ॥

इत्याशिषं प्रयुज्याब्रवीत् — 'राजन्मम सुचिराभ्यर्चितं शिवलिङ्गं केनाप्य-

पद्दतम् । त्रिचतुरैर्दिवसैरहमुपवसामि । अनाराध्य लिङ्गं न भुञ्जीय । यदीदं लिङ्गं ददासि तर्हि कृतार्थो भविष्यामि' इति । तच्छ्रुत्वा राजा तल्लिङ्गं तस्मै दत्वा निजनगरं जगाम" । इति सालभञ्जिकया कथितां कथामाकर्ण्य स राजा भोजः 'नाहमिदं सिंहासनं समारोढुमर्हामि' इति मन्वानो निववृते ॥

इति चतुर्दशमुपाख्यानम् ।

———(*)———

अथ पञ्चदशमुपाख्यानम् ।

अथैकदा यथापूर्वं सिंहासनमारोढुमागते धाराधिनाथे पञ्चदशी पाञ्चालिका विहस्य राजानमभाणीत् — कथमिव भूयोऽपि समागतोऽसि । अथापि समाकर्णय तस्य विक्रमस्य महौदार्यम् । "विक्रमे राज्यं कुर्वति सति तस्य वसुमित्रो नाम कश्चित्पुरोहित आसीत् । सोऽत्यन्तरूपवान् सकलकलाभिज्ञो राज्ञोऽत्यन्तप्रियतमः परोपकारी सर्वलोकप्रियो महाधनसंपन्नश्च । तस्य चैवंविधस्य चेतसि कदाचिदेवं बुद्धिरभूत् — उपार्जितानां पापानां गङ्गास्नानादृते क्षयो नास्ति । उक्तं च—

अग्निं प्राप्य यथा सद्यस्तूलराशिर्विनश्यति ।
तथा गङ्गावगाहेन सर्वपापं विनश्यति ॥ १ ॥
सर्वेषामपि भूतानां पापोहतचेतसाम् ।
गतिमन्वेषमाणानां नास्ति गङ्गासमा गतिः ॥ २ ॥ इति ।

एवं विचार्य वाराणसीं जगाम । तत्र गङ्गायां यथाविधि स्नात्वा विश्वेश्वरं माधवं च प्रणम्याभ्यर्च्य पञ्चक्रोशयात्रां विधाय पुनः प्रयागे माघस्नानं गयाश्राद्धं च विधाय स्वनगराभिमुखमागच्छन्मध्येमार्गमेकं नगरमगमत् । तत्र च नगरे शापदग्धा सुराङ्गना काचिद्राज्यमकरोत् । तस्याः पतिर्नासीत् । तत्र लक्ष्मीनारायणस्य महान्प्रासादोऽदृश्यत । तस्य च गोपुराग्रे चिरात्तप्ते महति लोहकटाहे तैलं सन्तप्यते स्म । तत्र नियुक्ताः पुरुषाः वैदेशिकान्जनानेवं ब्रुवन्तोऽवर्तन्त — 'यः कोऽपि सत्त्वाधिकः पुरुषोऽस्मिन्कटाहे निपतेत्तस्मैयं मन्मथसञ्जीविनी नामाप्सराः कण्ठे मालां समर्प-

यिष्यति' इति । वसुमित्रोऽपि तं वृत्तान्तं श्रुत्वा तत्सर्वं दृष्ट्वा स्वम... जगाम । आगत्य च सर्वैर्बन्धुभिःसह प्रभाते राजमन्दिरं गत्वा राजा... राज्ञे गङ्गोदकं विश्वेश्वरप्रसादं च दत्त्वा राजाज्ञया समुचित आसने समु... वेश । तदा राजा तमपृच्छत्— 'भो दिष्ट्या भवन्तं चिरादपश्यम्... सुखेन निर्वर्तिता पुण्यतीर्थयात्रा ?' इति । वसुमित्रः प्राह— 'भोः स्व... स्तव प्रसादात्तीर्थयात्रां विधाय क्षेमेण समागतोऽस्मि' इति । ततो ... 'देशान्तरे किं किमपूर्वमद्राक्षीः ?' इति पृष्टो वसुमित्रः सुराङ्गनातप्ततैलवृ... न्तमकथयत् । अनन्तरं राजा तेन सह तत्स्थानं गत्वा तत्र नद्यां कृत... षेको लक्ष्मीनारायणं नमस्कृत्य तप्ततैलमध्ये पपात । तत्रत्या जना म... कोलाहलमकुर्वन् । राज्ञः शरीरं मांसपिण्डाकारमभूत् । तच्छ्रुत्वा ... सञ्जीविनी पीयूषमानीय मांसपिण्डमभिषिषेच । ततो राजा दिव्यरू... कुमारः संवृत्तः । ततो मन्मथसञ्जीविनी कुसुममालां महीपतेः कण्ठे ... शयितुमाजगाम । तदा राजा 'भद्रे मदीयासि मामकं छन्दमनुवर्तस्व' ... जगाद । सापि 'आदिशत्वार्यपुत्रः' इत्याह । राजा 'अमुं मम पुरो... वृणीष्व' इत्यादिशत् । सा च 'महान्प्रसादः' इत्युक्त्वा पुरोहितकण्ठे ... ममालामक्षिपत् । राजापि तयोर्विवाहं कृत्वा तं वसुमित्रं तत्रैव राज्येऽभि... च्य निजनगरमगमत् ।" इति कथां कथयित्वा सालभञ्जिका 'कि... र्णितं विक्रमस्यौदार्यं धैर्यं च ?' इति भोजमप्राक्षीत् । सोऽपि तूष्... तस्तस्थौ ॥

इति पञ्चदशमुपाख्यानम् ।

———(*)———

अथ षोडशमुपाख्यानम् ।

भूयोऽपि कदाचित्ससम्भ्रममागच्छन्तं भोजमपरा पाञ्चालिका बभा... 'राजन्नुपसंहर सम्भ्रमम् । तिष्ठ । सर्वमप्याकर्णय विक्रमस्य वदान्यभा... पश्चाद्यदि रोचते तदुपविश । "राजा विक्रमः कदाचिद्दिग्विजयार्थ... त्साहो निर्गत्य पूर्वदक्षिणपश्चिमोत्तरा दिशो विदिशश्च परिभ्रम्य ...

नृपतीन्स्वपादपद्मसमाक्रान्तान्विधाय तैः समर्पिता रथगजाश्वादीनुपदाः स्वीकृत्योज्जयिनीं समागम्य यावत्प्रविवेश तावत्प्रधानो दैवज्ञः प्राह— 'देव चत्वारो दिवसा नार्हन्ति पुरप्रवेशम्' इति । तच्छ्रुत्वा राजा 'नगराद्बहिरुद्याने निवासं परिकल्पय' इति सचिवमादिदेश । सुमन्त्रनामा स च सचिवः ससम्भ्रमं समुचितं निवासं कारयामास । तत्रान्तरे ऋतुर्वसन्तोऽपि शनैरुद्यानं सिषेवे । वकुलशाखिनो मुकुलिताः । माकन्दाः कुसुमिताः । मन्दानिला वान्ति स्म । इतस्ततो भ्रमराश्च माकन्दमकरन्दमत्ताभिर्भ्रमरीभिः सह झङ्कारमकुर्वन् । सर्वा अपि लताः कुसुमभूषिता अशोभन्त । इत्थं वसन्तवैभवेनातिमनोहरे तस्मिन्नुपवने विक्रमादित्यः कतिचन दिवसान्सुखेन यापयन्नवर्तत । तस्मिन्नवसरे कश्चिद्ब्राह्मणः काञ्चन कन्यकां गृहीत्वा राजसमीपमागत्य,

> कल्याणदायि भवतोऽस्तु पिनाकपाणेः
> पाणिग्रहे भुजगकंकणभीषितायाः ।
> संभ्रान्तदृष्टि सहसैव नमः शिवायै-
> त्युक्त्वार्धलज्जितनतं मुखमम्बिकायाः ॥ १ ॥

इत्याशिषं प्रयुज्य राज्ञा निर्दिष्टां ब्रसीमास्थाय 'राजन्किंचिद्विज्ञापनमस्ति' इति विक्रममवादीत् । सोऽपि 'निःशङ्कं निवेद्यताम्' इत्याह । ब्राह्मणः "अहं नदीवर्धमाननगरनिवासी । ममाष्टौ पुत्राः समजायन्त । कन्यका पुनः कापि नाजनि । ततः सभार्योऽहं जगदम्बिकायाः पुरतः 'अम्ब यदि तवानुग्रहान्मम काचित्कन्यका जायेत तदा त्वन्नामधेयां तां तत्तुलितेन सुवर्णेन सह कस्मैचिच्चतुर्वेदविदे दीनाय च वराय दास्यामि' इति सङ्कल्पितवान् । ततः कतिपयैरेव दिवसैस्तस्याः प्रसादादेषा कन्या जाता । अयं चास्याः पाणिग्रहणसमयः । अतोऽनया तुलितं सुवर्णं दातुं त्वत्तोऽन्यो नास्तीति मत्वा तवान्तिकमहमागमम् । तन्ममेमं मनोरथं परिपूरयतु भवान्" इति निवेदयामास । ततो राजा भाण्डारिकमाहूय 'एतस्मै ब्राह्मणायैतत्कन्यापरिमितं सुवर्णं देहि' इत्यादिदेश । कोशाध्यक्षोऽपि 'महा-

प्रसादः' इत्युक्त्वा तस्मै विप्राय तावत्काञ्चनं ददौ । ब्राह्मणोऽप्यतिसन्तुष्टः सन्कन्यया सह जगाम । ततो राजापि शुभे मुहूर्ते पुरं प्रविवेश । " इति पाञ्चालिकोदीरितां कथां निशम्य भोजस्तूष्णीं निर्जगाम ॥

इति षोडशमुपाख्यानम् ।

———(*)———

अथ सप्तदशमुपाख्यानम् ।

पुनरपि राजानं भोजमागतमन्या सालभञ्जिकाभणत् 'राजन्नत्र सिंहासने समुपवेष्टुं स एव क्षमः यो विक्रम इवौदार्यादिगुणभूषितः' इति । राजा 'सालभञ्जिके कथय तस्यौदार्यादिकम्' इत्यपृच्छत् । ततः सालभञ्जिका कथयामास— "राजन्नौदार्येणैव त्रिष्वपि भुवनेषु विक्रमस्य कीर्तिर्विस्तृताभवत् । सर्वे जनास्तमेव तुष्टुवुः । लोके हि पुरुषस्यौदार्यमेवोत्तमो गुणः, न तु शौर्यादयः । तथा चोक्तम्—

युध्यन्ति पक्षिपशवः पठन्ति शुकसारिकाः ।
ददाति दानं यः कोऽपि स शूरः स च पण्डितः ॥ १ ॥ इति ।

विक्रमस्य औदार्यं वाचामगोचरम् । एकदा परमण्डले कस्यचिद्राज्ञः पुरतः केनचित्स्तुतिपाठकेन विक्रमस्य गुणावलिरपाठि । तां श्रुत्वा राज्ञा तिरस्कारमसूयया वन्दिनमुवाच 'रे वन्दिन्कुतो विक्रमार्कं स्तौषि ? किमन्यो राजा तादृशो नास्ति ?' इति । वन्दी प्राह— 'देव धैर्ये त्यागे परोपकारे साहसे दयायां च तेन सदृशो राजा त्रिभुवनेऽपि नास्ति' इति । तच्छ्रुत्वा स राजा 'अहमपि विक्रम इव परेषामुपकरिष्यामि' इति मनसि निधाय कञ्चन योगिनमाहूयोवाच—'भो योगिन्परोपकारकरणे मम प्रीतिरनुदिनमभिवर्धते । यदि कश्चिदुपायः स्यात्तन्निवेदयतु भवान्' इति । योगी प्राह— 'कृष्णचतुर्दश्यां चतुःषष्टियोगिनीचक्रं पूजय । तत्पुरतो मन्त्रं जप्त्वा तद्दशांशं तर्पणं तद्दशांशं होमं च विधेहि । होमावसाने पूर्णाहुतिनिमित्तं स्वशरीरमेवोपकल्पय । ततो योगिनीचक्रं प्रसन्नं भविष्यति । यत्त्वं प्रार्थयसे तच्च दास्यति । पुनरप्रतिमं शरीरं तव भविष्यति' इति । इत्थमभिधाय

स योगी रहस्यतमं मन्त्रमुपदिश्य पूर्वोक्तं चक्रं प्रदर्शयामास । ततो राजा तत्सर्वं सम्यगवधार्य तथैवानुष्ठाय पूर्णाहुतिनिमित्तं स्वयमेवाग्नौ पपात । ततो योगिनीचक्रदेवता प्रसन्ना भूत्वा राज्ञेऽभिनवं शरीरं दत्त्वा भणति स्म 'राजन्प्रसन्नास्मि । वरं वृणीष्व' इति । राजा प्रार्थयत—'अम्ब यदि प्रसन्नासि तर्हि प्रतिदिनं मम गृहं सप्तघटसुवर्णपरिपूर्णं विधेहि' इति । देवता प्राह—'यदि त्वं प्रतिदिनमेवं शरीरमग्नौ होष्यसि तदाहं तथा करिष्यामि' इति । राजाऽपि 'तथा करोमि' इत्यङ्गीकृत्य नित्यमग्नौ शरीरं सुवर्णार्थं जुह्वत्सुवर्णं चार्थिभ्यो यथेच्छं प्रयच्छन्नास्त । एकदा विक्रमस्तं वृत्तान्तमाकर्ण्य नितान्तं दयया समाविष्टस्तत्स्थानं समागत्य पूर्णाहुतिसमये स्वयमेवाग्नौ पपात । ततो योगिनी स्वयमचिन्तयत्—'किमद्यतनं मांसमतीव स्वादु वर्तते ? अस्य हृदयमतीव सारभूतमिव भाति' इति । इत्थं चिन्तयित्वा विक्रमाय पुनः शरीरं दत्त्वा जगाद—'भो महासत्त्व को भवान् ? तव शरीरत्यागे को हेतुः ? अभिलषितं वरं वृणीष्व' इति । ततो विक्रमः प्रार्थयत—'भगवति यदि प्रसन्नासि तर्हि राजानममुं प्रतिदिनं सप्तघटपरिमितसुवर्णप्रदानेन पूर्णमनोरथं कुरु । प्रतिदिनं शरीरहोमदुःखं च यथास्य न स्यात्तथामुमनुगृहाण' इति । योगिनी च 'तथा करोमि' इत्यङ्गीकृत्य तस्य गृहे प्रतिदिनं सप्त महाघटान्सुवर्णेन पूरयामास । राजानं च होमान्निवारयामास । विक्रमोऽपि तेन राज्ञा तदीयप्रकृतिभिश्च सुतरां संस्तूयमानो निजं नगरमाजगाम ।" इति कथां सालभञ्जिकया कथितां निशम्य भोजः श्लथोत्साहो विकृते ॥

इति सप्तदशमुपाख्यानम् ।

———(*)———

अथाष्टादशमुपाख्यानम् ।

पुनरपि कदाचिद्भोजभूपाले सिंहासनमारोढुमागच्छति पाञ्चालिकापरा त्रिविध्यावोचत्—'भो राजन्विक्रमस्यौदार्यादिगुणा यस्य सन्ति तेनैवैतस्मिन्नासनमध्यासितव्यम् । अतः श्रूयतां तस्य ते गुणाः । अनन्तरं यदि रोचते

तर्ह्यस्मिन्नासने समुपविश । "विक्रमो राजनीतिमणुमात्रमपि नोल्लङ्घयेत् । तस्य प्रकृतयोऽपि मन्वादीनां प्रजापरिपालनसमय इव नीतिमार्गाद्रेखामात्रमपि नैव चलन्ति स्म । तस्य च प्रजासु गोविन्दशर्मा नाम ब्राह्मणः कश्चिन्मणिपुरनिवासी स्वपुत्राय नीतिमेवमुपदिदेश । अहमप्यश्रौषम् । तत्तुभ्यं निवेदयामि— 'पुत्र मतिमता पुरुषेण दुर्जनैः संसर्गो न विधेयः । यतो महान्तोऽनर्थाः सम्भवन्ति । सज्जनैस्तु सङ्गो विधेयः । यतो बहूनि कल्याणानि भवन्ति । किंच बुद्धिमान्नरः केनापि वैरं न कुर्वीत । परेषां सन्तापं न जनयेत् । अपराधं विना भृत्यान्न निन्देत् । महादोषं विना भार्यां न परित्यजेत् । चञ्चलां लक्ष्मीं स्थिरां न मन्येत । स्त्रीभ्यो गुह्यं न निवेदयेत् । भविष्यच्चिन्तां न कुर्यात् । वैरिणामपि हितमेव चिन्तयेत् । दानाध्ययनादिभिर्विना दिवसं मुधा नापनयेत् । पितरौ भक्त्या सेवेत । चोरैः सह न संलपेत् । सर्वदा निष्ठुराणि वचनानि न भाषेत । अल्पनिमित्तं बहुव्ययं न कुर्यात् । तथा च वदन्ति—

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेव हि पाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम् ॥१ ॥ इति ।

आर्येभ्यो यथाशक्ति दद्यात् । धर्मस्थाने मृषा न भाषेत । मनसा वाचा कर्मणा च परोपकारं कुर्वीत' इति । इतोऽन्याश्च बहुविधा नीतीर्विक्रमस्य प्रजा अन्वसरन् । एवं राज्यं कुर्वति तस्मिन्नेकदा कश्चिद्वैदेशिको ब्राह्मणस्तत्सभामाजगाम । राजा तं दृष्ट्वा यथोचितासनदानादिना सम्भाव्य 'को भवान्? कस्माद्देशादागम्यते भवता?' इति पप्रच्छ । ब्राह्मणोऽपि 'अहं वैदेशिकः । मम कोऽपि निवासो नास्ति । सर्वदा परिभ्रमन्नेव कालं नयामि' इत्याह । ततो राजा 'पृथ्वीपर्यटनात्त्वया किमपूर्वं दृष्टम्? कथय' इति पुनः पप्रच्छ । तदा ब्राह्मणः प्राह— 'देव, उदयपर्वते महानादित्यस्य प्रासादोऽस्ति । तत्र गङ्गा नाम काचिन्नदी प्रवहति । तत्प्रवाहस्यान्तः कश्चित्सुवर्णस्तम्भोऽस्ति । तस्योपरि नवरत्नखचितं सिंहासनमेकं वर्तते । स च सुवर्णस्तम्भः प्रागुदयति विभावसौ प्रवाहान्निर्गम्य गगनमध्यमारूढे

तस्मिन्स्वयमपि क्रमेण तस्य संनिहितो भवति । अस्तमुपगच्छति च तस्मिन्स्वयमपि क्रमेणावतीर्य गङ्गाप्रवाहे निमज्जति । प्रतिदिनमेवं तत्र प्रवर्तमानं महदाश्चर्यं मया दृष्टम्' इति । ततो राजा विक्रमोऽपि तेन सहोदयगिरिं गत्वा रात्रौ सुखं सुष्वाप । प्रभातायां च शर्वर्यामुदयमाने च सवितरि गङ्गाप्रवाहात्सिंहासनयुक्तो हेमस्तम्भो मन्दं मन्दं निर्जगाम । राजापि स्तम्भाग्रस्थितसिंहासने समुपविवेश । स्तम्भोऽपि क्रमेण सूर्यमण्डलसमीपं जगाम । तावदग्निकणसमुद्गारिभिः सूर्यकिरणैरदह्यत राज्ञः शरीरम् । तथापि राजा मांसपिण्डीभूतेन शरीरेण सूर्यमण्डलं प्राप्यास्तौषीत्—

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशंकरात्मने ॥ २ ॥ इति ।

एवं स्तुत्वा परमात्मानमर्यमणं नमश्चकार । ततः सूर्यस्तं स्वीयकिरणामृतेनासिञ्चत् । ततो राज्ञः शरीरं पूर्ववत्स्वस्थमभूत् । ततः सूर्यो राजानमुद्दिश्य 'भो राजन्महासत्त्वोऽसि, यतोऽन्यैर्दुष्प्रापमेतन्मम मण्डलमुपागमः । तदहं तव प्रसन्नोऽस्मि । वरं वृणीष्व' इत्याह । ततो राजा 'भो भगवन्नर्यमन्किमतः परमधिको वरोऽस्ति, यन्मुनीनामपि दुर्लभं तव दर्शनं मम जातम् । किं च भगवदनुग्रहान्मम सर्वमप्यर्थजातं निरपायं वर्तते' इति व्यजिज्ञपत् । ततस्तस्य सत्त्वेन वचनेनान्यैर्गुणैश्चातीव सन्तुष्टो भगवानर्यमा स्वकीये रत्नमये कर्णकुण्डले विक्रमाय दत्त्वा प्राह—'राजन्नेतत्कुण्डलद्वयं प्रत्यहमेकं सुवर्णभारं प्रयच्छेत्' इति । राजापि तद्गृहीत्वादित्यं प्रणम्य तदनुज्ञामवाप्य तस्मात्सुवर्णस्तम्भादवतीर्य यावदुज्जयिनीमाजगाम तावत्कश्चिद्ब्राह्मणो मार्गे समागत्य 'राजंश्चिरं जीव' इत्याशिषं प्रयुज्य 'भो राजन्नहं कुटुम्बी ब्राह्मणः, परं दरिद्रः, सर्वत्र भिक्षाटनं करोमि । तथाप्युदरं न पूर्यते । अतो यथा मम दारिद्र्यं निवर्तेत तथा प्रसादः क्रियताम्' इति प्रार्थयत । तच्छ्रुत्वा राजापि दयार्द्रहृदयो भास्करदत्तं कुण्डलद्वयं तस्मै समर्प्य

'भो ब्राह्मणोत्तम भगवता सवित्रा मम समर्पितमेतत्कुण्डलद्वयं प्रतिदिनमेकं सुवर्णभारं दद्यात् । अनेन दारिद्र्यदुःखमपनीय सुखी भवतु भवान्' इत्युक्त्वा तं प्रेषयामास । स्वयमप्युज्जायिनीमगमत् ।" इति कथां पाञ्चालिकया कथितामाकर्ण्य भोजस्तूष्णीमास ॥

इत्यष्टादशमुपाख्यानम् ।

(*)

अथैकोनविंशमुपाख्यानम् ।

भूयोऽपि कदाचित्सिंहासनसमारुरुक्षया समागतं भोजमहीपालमपरा सालभञ्जिका निवार्य भणति स्म— "महीपाल श्रूयताम् । विक्रमे रत्नाकरमेखलामिमां शासति सर्वेऽपि लोकाः परमानन्दपरिपूर्णहृदयाः समभूवन् । ब्राह्मणाः षट्कर्मनिरताः, स्त्रियः पतिव्रताः, शतायुषः पुरुषाः, वृक्षाः सदा फलकुसुमभरिताश्चासन् । पर्जन्यः काले वर्षति स्म । मही सर्वफलदा समभवत् । लोकानां सर्वभूतेषु दया, पापाद्भीतिः, अतिथिपूजायामादरः, गुरुसेवायामासक्तिः, सत्पात्रेभ्यो यथोचितवितरणं च समभूत् । इत्थं महीं पालयन्स भूपालः कदाचित्सभायां सुमनोभिः सह तत्तच्छास्त्रार्थान्विचारयन्नास्त । तदा वन्दिनो विविधावदानानि पेठुः । मल्लाः पुनः स्वभुजबलमदर्शयन् । अन्ये च बहवः कलाकुशलास्तत्तत्कलायां तेषां कौशलं प्राकाशयन् । एतस्मिन्समये कश्चिन्मृगवधाजीवः समागत्य राजानं प्रणम्य सप्रश्रयं व्यजिज्ञपत्— 'देव, अरण्ये कश्चिदञ्जनाचलसङ्काशो महान्वराहः कतिपयैर्दिवसैः परिभ्रमति । वनैकवसतेरस्यापि जनस्याश्रुतपूर्वोऽयमीदृशो जन्तुः । किं पुनरदृष्टचर इति । तदेष दुष्टमृगो देवस्य दृष्टिपथमवतरितुमर्हति' इति । तच्छ्रुत्वा राजा तदैव राजकुमारैः सह वनं विवेश । प्रविश्य च नदीतटे कुत्रापि निकुञ्जान्तरे शयानं तं सूकरमपश्यत् । तदानीं च स सूकरो मृगयूनां कोलाहलं श्रुत्वा घुर्घुरारवमुखरो निर्जगाम । ततः सर्वेऽपि राजकुमारा अहमहमिकया स्वहस्तकौशलानि दर्शयन्तो नानाविधान्यायुधानि तदुपरि चिक्षिपुः । स च तान्यगणयन्पश्यतामेव शूराणां कमपि पर्वतकन्दरं

विवेश । विक्रमोऽपि तं पृष्ठतोऽनुधावन्बहिरश्वं निबध्य स्वयमपि बिलं प्रविवेश । ततो महत्यन्धकारे सुदूरं गत्वा महान्तं प्रकाशमपश्यत् । ततः किंचिद्दिवातिक्रम्य नगरमेकं सुवर्णप्राकारमभ्रंकषप्रासादोपशोभितं देवायतनैरुपवनैश्चालंकृतं समस्तवस्तुसंपूर्णविपणिरमणीयं धनिकलोकसमाकुलं नानाविलासिनीजनसंसेव्यमानमतिमनोहरमपश्यत् । अथ कथमपि प्रविश्य विपणिमध्ये गच्छन्नतिमनोहरं हरशिखरिसहोदरं राजभवनमपश्यत् । तत्र विरोचनसुतो बली राज्यं कुर्वन्नास्त । राजापि तत्सभां प्रविश्य सिंहासनोपविष्टेन बलिना झडिति समालिङ्गितोऽतिरमणीये भद्रासने समुपवेशितः । अनन्तरं बली विक्रममप्राक्षीत्—'सखे कुत्र ते निवासः ? । कानि तव नामाक्षराणि ? । कथमिव दुरवगाहमिमं प्रदेशं प्रविष्टोऽसि ?' इति । राजा प्राह—'विक्रमनामानं मामाहुः । उज्जयिनी मे निवासः । भवत्सन्दर्शनार्थं कमपि वराहमनुसरन्कथमपि समागतोऽस्मि' इति । बलिराह—'धन्योऽस्मि । अद्य सफला मे मनोरथाः' इति । विक्रमः प्रत्यभाषत—'राजन्भवान्परमपावनान्तःकरणः । तवैव जीवितं श्लाघ्यम्, यतः साक्षाद्वैकुण्ठभवनो नारायणस्तव मार्गणतामाललम्बे' इति । बली जगाद—'यदि भवान्मित्रमसि तर्हि मदीयं किमपि वस्तु भवता ग्राह्यम्' इति । विक्रमः—'भवदनुग्रहादहमपि पूर्णकामोऽस्मि' इति प्रत्याह । बली 'सखे मैवम् । एतदेव हि बन्धुलक्षणम् । तथा चोक्तम्—

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं बन्धुलक्षणम् ॥ १ ॥ इति ।

किंच, नोपकारं विना प्रीतिः कस्यापि भुवि जायते ।
उपयान्ति च दानेन यतो देवा अभीष्टदाः ॥ २ ॥
तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते ।
वत्सः क्षीरक्षयं दृष्ट्वा स्वयं त्यजति मातरम् ॥ ३ ॥'

इति भणित्वा विक्रमाय रसं रसायनं च ददौ । विक्रमोऽपि तद्द्वयं गृहीत्वा तस्मादनुज्ञामवाप्य बिलान्निर्गत्याश्वमारुह्य निजपुरं प्रत्यागत्य राजमार्गे स-

मागच्छति महादुर्गतिपीडितः सपुत्रः कश्चिद्ब्राह्मणः समागत्य तस्मा आशिषं प्रयुज्य भणति स्म— 'भो राजन्नहं केवलं दरिद्रः । अद्य सकुटुम्बस्य मम किमपि भोजनपर्याप्तं धनं दीयताम् । महत्या बुभुक्षया पीडिताः स्मः । दिष्ट्या च भवद्दर्शनं सञ्जातम्' इति । ततो राजा तमब्रवीत्— 'भो ब्राह्मण, इदानीं मम हस्ते किमपि धनं नास्ति । परं तु रसो रसायनं चेति वस्तुद्वयमस्ति । तत्र रसेन संपर्के सति सप्त धातवः सुवर्णानि भवन्ति । रसायनसेवनेन च पुरुषो जरामरणवर्जितो भविष्यति । तदनयोरुभयोरेकं गृहाण' इति । तदा ब्राह्मणः 'येन पुमाञ्जरामरणवर्जितो भविष्यति तद्दीयताम्' इत्याह । तत्पुत्रस्तु 'किं क्रियते तातेन रसायनेन? । जरामरणवर्जितेनापि दारिद्र्यमेवानुभवितव्यम् । अतो येन सप्त धातवः सुवर्णानि भवन्ति स रस एव ग्राह्यः' इति । इत्थं पितृपुत्रयोर्विवादो राजसमक्षमेव समभूत् । राजा तूभयोर्विवादं दृष्ट्वा रसं रसायनं च ताभ्यां प्रददौ । तौ च परमसन्तुष्टौ राजानं स्तुत्वा निजालयं जग्मतुः । राजापि निजनिवासमाजगाम ।" इति कथां सालभञ्जिकया कथितां श्रुत्वा भोजभूपालस्तूष्णीं निववृते ॥

इत्येकोनविंशमुपाख्यानम् ।

———(*)———

अथ विंशमुपाख्यानम् ।

पुनरपि कदाचिद्भोजे सिंहासनसमारुरुक्षया समागतेऽपरा सालभञ्जिका समाक्षिप्य जगाद— भो राजन्विक्रमस्यौदार्यादिगुणा यस्य सन्ति स एवास्मिन्नुपवेष्टुमर्हति । श्रूयतां तस्य ते गुणाः— "स हि भूपालः कदाचित्स्वराज्ये वसन् षण्मासान्देशान्तराणि परिभ्रमंश्च कदाचिदासीत् । तदा च नानादेशान्परिक्रम्य पद्मालयं नाम नगरमेकमगमत् । तन्नगराद्बहिःस्थिते चोपवने मनोहरं विमलोदकं च सरोवरं दृष्ट्वा तत्रोदकं पीत्वा कुत्रापि तरुतले सुखमुपविवेश । तत्रान्ये केचन वैदेशिकाः समागत्य जलं पीत्वोपविश्य परस्परं गोष्ठीमकुर्वन्त । तत्र च केचिदेवमब्रुवन्— 'अहो अस्माभिर्बहवो देशा दृष्टाः । बहूनि तीर्थानि सेवितानि । अतिदुर्गमाः पर्वताः समारूढाः ।

परमेकत्रापि महापुरुषदर्शनं नाभूत्' इति । अन्ये केचनैवं प्रत्यब्रुवन्— 'कथं नामास्माकं महापुरुषदर्शनं भवेत्? । यत्र हि स्थाने महापुरुषो वर्तते तदतीव दुर्गममेव भवेत् । मध्ये च बहवः प्रत्यूहाः समापतेयुः । देहस्यापि कदाचिन्नाशो भवेत् । अतो महापुरुषदर्शने प्रयत्नो न कार्यः । तथा चोक्तम्—

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च कार्याणि नारभेत विचक्षणः ॥ १ ॥' इति ।

एवं तेषां वचनं श्रुत्वा विक्रमः संनिधाय तानवदत्— 'भो वैदेशिकाः किमेवमुच्यते? । यावत्पुरुषेण पौरुषं साहसं च न क्रियते तावत्सर्वमपि दुर्लभम् । पौरुषे साहसे च कृते दुर्लभान्यपि वस्तूनि सुलभानि भवन्ति' इति । तच्छ्रुत्वा वैदेशिका अपृच्छन्— 'भो महासत्त्व तर्हि किं कार्यं कथय' इति । राजा प्रत्यवदत्— 'महापुरुषदर्शनमेव कार्यम् । अस्मान्नगराद्द्वादशयोजनतः परं महारण्यमध्ये विषमः कश्चित्पर्वतोऽस्ति । तदुपरि महानुभावोऽणिमादिसिद्धियुक्तश्च त्रिकालनाथो नाम कश्चिद्योगी विद्यते । स तु सेवितो वाञ्छितार्थं दास्यति । अहं तत्र गमिष्यामि' इति । ततो वैदेशिकाः 'वयमप्यागमिष्यामः' इत्यूचुः । राजा सुखमागम्यतामित्याह । ततस्ते राज्ञा सह निर्गत्य महदरण्यमतिविषमं दृष्ट्वा राजानं पप्रच्छुः— 'भो महासत्त्व कियद्दूरे पर्वतोऽस्ति?' इति । राजा 'इतोऽष्टौ योजनानि वर्तते' इति प्राह । ततो वैदेशिकाः 'तर्हि वयं नागमिष्यामः । महद्दूरमस्ति । मार्गोऽप्यतिविषम इव दृश्यते' इत्यूचुः । राजा प्राह— वैदेशिकाः, व्यवसायिनां किं नाम दूरम्? । तथा हि वदन्ति—

नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम् ।
व्यवसायवतां पुंसां नापारश्च महोदधिः ॥ २ ॥ इति ।

ततो वैदेशिकाः कतिचिद्योजनानि कथमप्यतीत्य पुरतो महाकरालवदनं विषाग्निमुद्वमन्तं कमपि सर्पं मार्गमावृत्य स्थितमद्राक्षुः । दृष्ट्वा च भीताः पलायन्त । विक्रमस्तु धैर्यमवलम्ब्य गन्तुमेव प्रावर्तत । ततः स सर्पः समागत्य राजानं परिवेष्ट्यादशत् । तदानीमपि 'विपदि धैर्यम्' इति न्यायेन धैर्यमव-

रित्यज्य तेन वेष्टित एव सन्विषवेगान्मूर्छन्नप्यतिदुर्गमं तं पर्वतमारुह्य योगिनं त्रिकालनाथं दृष्ट्वा नमश्चकार । योगिसन्दर्शनमात्रेण सर्पस्तं मुक्त्वा प्रससार । राजापि निर्विषो बभूव । ततो योगी राजानमपृच्छत्— 'भो महासत्त्व, प्रमादभूयिष्ठमेतदमानुषं स्थानमतिकष्टेन किमर्थमागतोऽसि ?' इति । राजा न्यवेदयत्— 'भोः स्वामिन्भवत्सन्दर्शनार्थमेव समागतोऽस्मि' इति । योगी प्राह— 'महत्कष्टमनुभूतं त्वया' इति । राजा बभाण— 'किमपि कष्टं नास्ति । भवत्सन्दर्शनमात्रेण सकलमपि कल्मषं नामशेषमभूत्' इति । ततो योगी तस्य महासत्त्वतयान्यैश्च गुणैरतीव प्रसन्नो विक्रममहीपालाय घुटिकां योगदण्डं कन्थां च दत्त्वाब्रवीत्— 'भो राजन्ननया घुटिकया भूमौ यावत्यो रेखा विलिख्यन्ते तावन्ति योजनान्येकस्मिन्क्षणे गन्तुं शक्यते । अमुना योगदण्डेन दक्षिणहस्तविधृतेन स्पृश्यते यदि मृतं सैन्यं सजीवं भूत्वोत्तिष्ठेत् । वामहस्ते धृत्वा वैरिसैन्यं दृश्यते यदि तदा सर्वमपि तन्नश्येत् । इयं च कन्था, ईप्सितं वस्तु दद्यात्' इति । ततो राजातीव हृष्टस्तानि गृहीत्वा योगिनं नमस्कृत्य तदनुज्ञां चावाप्य प्रत्याजगाम । तावन्मार्गे कश्चिद्राजकुमारोऽभ्यग्नि तिष्ठन्काष्ठसञ्चयेनाग्निं वर्धयन्पतनोन्मुख इव राज्ञादृश्यत । पृष्टश्च 'भोः सौम्य किमेवं क्रियते ?' इति । राजकुमारः प्रत्यभाषत— 'अहं कस्यचिद्राज्ञः कुमारः । मम राज्यं दायादैरपहृतम् । दरिद्रोऽहं जीवितं धारयितुमसहमानोऽग्निं प्रवेष्टुं काष्ठैस्तं वर्धयामि' इति । तच्छ्रुत्वा विक्रमस्तस्याभयं दत्त्वा घुटिकां योगदण्डं कन्थां च तस्मै समर्प्य तेषां गुणानप्यकथयत् । राजकुमारोऽपि महासन्तोषसागरनिमग्नो विक्रममभिवन्द्य स्वदेशमगमत् । विक्रमोऽप्युज्जयिनीमाजगाम ।" इति कथां कथयित्वा सालभञ्जिका भोजराजमवदत्— 'भो राजन्, त्वय्येवमौदार्यं धैर्यं परोपकारश्च यदि विलसति तर्ह्यस्मिन्सिंहासने समुपविश' इति । तच्छ्रुत्वा राजा तूष्णीमपाससार ॥

इति विंशमुपाख्यानम् ।

———(*)———

अथैकत्रिंशत्पुत्तलिकाख्यानम् ।

भूयोऽप्येकदा सिंहासनसमारोहणसमुचितवेषो भोजभूपतिः समागत्य पाञ्चालिकया निवारितस्तामाह— 'कथय तस्यौदार्यवृत्तान्तम्' इति । साब्रवीत्— "विक्रमे राज्यं कुर्वति बुद्धिसिन्धुर्नाम कश्चिन्मन्त्री तस्य समभूत् । तस्यानर्गलो नाम कश्चित्पुत्रः समजायत । स च प्रत्यहं भृतौदनं भुक्त्वा कुमारवृत्त्या सञ्चरन्नास्त । विद्याभ्यासे तु प्रवृत्तिस्तस्य न कदापि बभूव । एवं सति पिता बुद्धिसिन्धुस्तमवादीत्— 'भो अनर्गल, त्वं ममोदराज्जातोऽसि । परं दुर्विवेको विद्याभ्यासं न करोषि । मूर्खस्तिष्ठसि । ममापि कोऽप्यर्थस्त्वत्तो नास्ति । तथा च श्रूयते—

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
किं तया क्रियते धेन्वा या न दोग्ध्री न गर्भिणी ॥ १ ॥ इति ।

अतः, इतः परमपिवा त्वं मदीयमुपदेशमनुसृत्य स्वच्छन्दवृत्तिं परित्यज्य यदि विद्यामभ्यस्यसि तदा तव श्रेयो भवेत् । अहमपि त्वया कृतार्थो भवेयम्' इति । इत्थं पितृवचनं समाकर्ण्य पश्चात्तापसन्तप्तोऽनर्गलः 'यत्र कुत्रापि देशे विद्यामभ्यस्य ज्ञानं संपाद्य पितृमुखमवलोकयिष्ये' इति निश्चित्य देशान्तरं जगाम । तत्र कस्यचिदाचार्यस्य कृपया सर्वाणि शास्त्राण्यधीत्य समुत्पन्नज्ञानो निजनगरं प्रत्यागच्छन्मार्गे मध्येऽरण्यं कमपि देवालयमपश्यत् । तत्समीपे च पद्मषण्डमण्डितं चक्रवाकमिथुनालंकृतमतिविमलोदकं किंचित्सरोवरमद्राक्षीत् । तस्य चैकदेशेऽतिसन्तप्तमुदकमदृश्यत । तच्च दृष्ट्वानर्गलः 'किमेतत्?' इति मनसि विचिन्तयंस्तत्रोपविवेश । ततः सूर्योऽस्तमगात् । अर्धरात्रे च तप्तोदकमध्यादष्टौ दिव्यस्त्रियो निर्जग्मुः । निर्गत्य च देवालयं गत्वा देवस्यावाहनादीन्षोडशोपचारान्कृत्वा नृत्तगीतादिभिर्देवमतोषयन् । ततो देवः प्रसन्नो भूत्वा ताभ्यः प्रसादमयच्छत् । एतत्सर्वमनर्गलः पश्यन्प्रभातसमये निर्गमनवेलायां ताभिर्व्यलोकि । तदा तासामेका जगाद— 'भोः सौम्य, एहि । अस्मन्नगरं गमिष्यामः' इति । सोऽपि 'बाढम्' इति ताभिः सह गच्छंस्तप्तोदकमध्यं प्रविष्टासु तासु स्वयं

भयादपसृत्य स्वनगरमागत्य पितृप्रमुखान्सर्वान्बन्धूनपश्यत् । परेद्युश्च राजदर्शनार्थं गत्वा राजानं प्रणम्योपविवेश । तदा राजा सकुतूहलं तमपृच्छत् —'भो अनर्गल, एतावन्तं कालं कुत्र न्यवात्सीः ?' इति । अनर्गलः प्रत्यवदत् — 'विद्याभ्यासार्थं देशान्तरे कालमनयम्' इति । राजा पुनरपृच्छत् 'देशान्तरे किं किमपूर्वं त्वया दृष्टम् ?' इति । ततोऽनर्गलस्तत्तोदकवृत्तान्तमकथयत् । तच्छ्रुत्वा राजा तेन सह तत्स्थानं गतवान् । सूर्यश्चास्तं जगाम । अर्धरात्रसमये च ता दिव्यस्त्रियस्तत्तोदकमध्यान्निर्गत्य देवसमीपं गत्वा पूजां विधाय नृत्तगीतादिना देवं प्रसाद्य तत्प्रसादं च समवाप्य प्रभाते न्यवर्तन्त । तदानीं तासां मध्ये काचिदङ्गना राजानं दृष्ट्वा समवदत् — 'भोः सौम्य, एहि । अस्मन्नगरं गच्छामः' इति । तच्छ्रुत्वा राजा ता अनुजगाम । ताः सर्वाः तत्तोदकान्तः प्रविश्य पाताले निजनगरं जग्मुः । राजापि धैर्यमवलम्ब्यौत्सुक्यात्तत्तोदकं प्रविश्य सहैव ताभिर्जगाम । ततस्ता महासत्त्वं तमवलोक्य विस्मिताः प्रोचुः — 'भो महाधीर को भवान् ?' इति । विक्रमः प्राह — 'अहमुज्जयिनीपतिः । एतत्कुतूहलं द्रष्टुं भवतीभिश्च समाहूतः समागतोऽस्मि' इति । ततस्ताः प्रोचुः — 'भो महासत्त्व वयं प्रसन्नाः स्मः । वरं वृणीष्व' इति । राजा 'भवत्यः काः ?' इति पप्रच्छ । ताश्च 'वयमष्ट महासिद्धयः' इति प्रत्यूचुः । राजा 'तर्हि मह्यमष्टौ सिद्धीर्दिशत' इति प्रार्थयत । ततस्ता राज्ञेऽष्टौ रत्नानि ददुः । सोऽपि तान्यष्टसिद्धियुक्तानि रत्नानि गृहीत्वा तत्तोदकान्निर्गत्य स्वनगरमाजगाम । तावन्मार्गे कश्चिद्ब्राह्मणः समागत्य,

उत्पन्नो नाभिकमले हरेर्यश्चतुराननः ।
स पातु सततं युष्मान्वेदानामर्थपारगः ॥ २ ॥

इत्याशिषं कृत्वा 'राजन्नहं महादारिद्र्यपीडितो बहुपुत्रपौत्रादिकुटुम्बः कुटुम्बभरणासमर्थो गङ्गां प्रविश्य प्राणांस्त्यक्ष्यामीति समागतोऽस्मि । दैवादद्य भवान्मम दृष्टिगोचरीभूतः । अतः कृतार्थीकृतार्थिसार्थो भवान्मामपि दारिद्र्यनिवारणेन कृतार्थयितुमर्हसि' इति प्रार्थयामास । तच्छ्रुत्वा राजा तान्यष्टौ

रत्नानि तस्मै ददौ । सोऽपि विप्रो रत्नानि गृहीत्वा राजानं स्तुत्वा स्वपुरं जगाम । राजाप्युज्जयिनीमगमत् । ” इति सालभञ्जिकया कथितां कथां निशम्य भोजराजस्तादृशं धैर्यमौदार्यं चात्मन्यपश्यंस्तूष्णीं न्यवर्तत ॥

इत्येकविंशमुपाख्यानम् ।

———(*)———

अथ द्वाविंशमुपाख्यानम् ।

भूयोऽपि कदाचिद्धारानगरीभूवल्लभे विश्वम्भराधिनाथे सिंहासनं समारोढुं ससंभ्रमं समागते सालभञ्जिकापरा विहसन्ती जगाद । भो राजञ्छ्रूयताम् — “ विक्रमादित्यो राज्यं कुर्वन्नेकदा पृथ्वीपर्यटनार्थं निर्गत्य नानादेवालयपुण्यतीर्थपर्वतादिकं दृष्ट्वा कदाचिन्महारत्नमयप्राकारपरिवृतमभ्रंलिहप्रासादोपशोभितमनेकहरिहरालयपवित्रितं नगरमेकमगमत् । तत्र च भगवतो नारायणस्य दर्शनार्थं तदालयं गत्वा तत्रस्थसरोवरे स्नात्वा भगवन्तं नारायणं परमोत्साहसमुल्लासिताभ्यां प्रोत्फुल्लनलिनदलसहोदराभ्यां लोचनाभ्यां समवलोक्य ;

नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय ।
नानाचराचरविधायकजन्मदेश-
नाभीपुटाय पुरुषाय नमः परस्मै ॥ १ ॥

इति श्लोकं पठन्नमस्कृत्य बह्वीभिः स्तुतिभिः स्तुत्वा रङ्गमण्डपे विशश्राम । तत्र कश्चिद्ब्राह्मणः समागत्य राजसमीपे समुपविवेश । तदात्वे राजा तमपृच्छत् ‘ भो ब्राह्मण कुतस्त्यो भवान् ? ’ इति । स प्राह ‘ अहं तीर्थयात्रापरः कश्चिद्ब्राह्मणः । भवान्कुतः समायातः ? ’ इति । ततो राजा ‘ अहमपि भवानिव तीर्थयात्रापरः कश्चित् ’ इति प्रत्यवदत् । अनन्तरं स विप्रः राजानं सम्यगवलोक्य पृच्छति स्म — ‘ भवानतितेजस्वी दृश्यते । सर्वाणि राजलक्षणानि त्वयि सन्दृश्यन्ते । त्वं राजसिंहासनमर्हसि । कुतः पृथिवीं पर्यटसि ? ’ इति । राजा प्रत्यब्रवीत् — ‘ अहमुज्जयिनीपतिः विक्रमनामानं

मामाहुः । नानादेशसमालोकनौत्सुक्यात्केवलं पृथ्वीं पर्यटामि' इति । ब्राह्मणः — 'यथा तथा वा भवतु । ललाटलिखितं न कोऽपि लङ्घयितुमीष्टे । तथा च पौराणिकाः —

हरिणापि हरेणापि ब्रह्मणापि सुरैरपि ।
ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते ॥ २ ॥ इति ।

ततो राजाब्रवीत् — 'सत्यमेवैतत । दैवं हि सर्वस्माद्बलीयः । भवत्वेतत् । कुतो भवानतिश्रान्त इव दृश्यते?' इति । ब्राह्मणः प्रत्यवदत् — 'शृणु राजन्, इतो नातिदूरे नीलो नाम कश्चित्पर्वतोऽस्ति । तत्र हि किञ्चित्पातालबिलमस्ति । तन्मध्ये कामाक्षी नाम देवता वसति । तत्र कश्चिद्रसकुम्भो दृश्यते । तेन च रसेन धातवः सुवर्णतां यान्ति । तादृशरसलाभार्थं द्वादश वर्षाणि कामाक्षीमन्त्रमजपम् । तथापि बिलद्वारं नोद्घाट्यते । तेनातिदुःखितोऽस्मि' इति । तच्छ्रुत्वा विक्रमः 'तत्स्थानं मम दर्शय । मया कोप्युपायः क्रियते' इत्याह । ततो ब्राह्मणेन तत्स्थानं राज्ञे प्रदर्शितम् । सूर्योऽप्यस्तगिरिशिखरमाललम्बे । राजापि सायंतनं कर्मकलापं परिसमाप्य तत्रैव सुष्वाप । ततः स्वप्ने देवता समागत्य राजानं जगाद — 'राजन्किमर्थमागतोऽसि? । द्वात्रिंशल्लक्षणयुक्तस्य पुरुषस्य कण्ठरक्तसेचनं विना बिलद्वारमिदं नोद्घाट्येत' इति । ततो विक्रमः प्रबुध्य बिलद्वारसमीपं गत्वा निजकण्ठं छेत्तुं यावदुपचक्रमे तावद्देवता राजसमक्षमागत्य 'भो राजन्साहसप्रिय तवाहं प्रसन्नास्मि । वरं वृणीष्व' इति प्रोवाच । राजापि 'यदि प्रसन्नासि भगवति तर्ह्यस्मै ब्राह्मणायामुं रसकुम्भं प्रयच्छ' इत्येवं वरमवृणीत । देवतापि तथेत्यङ्गीकृत्य बिलद्वारमुद्घाट्य ब्राह्मणाय रसकुम्भं प्रददौ । सोऽपि राजानं स्तुत्वा निजस्थानं जगाम । राजापि निजनगरमगमत् ।" इति कथां प्रकथ्य पाञ्चालिका भोजराजमवादीत् — 'भो राजंस्त्वय्येवमौदार्यं साहसं परोपकारश्च यदि विद्यते तदास्मिन्विक्रमार्कसिंहासने समुपविश' इति । तच्छ्रुत्वा भोजभूपतिरनुक्त्वैव प्रतिवचनं तस्मात्प्रयत्नादुपारराम ॥

इति द्वाविंशमुपाख्यानम् ।

———(*)———

अथ त्रयोविंशमुपाख्यानम् ।

पुनरपि राजा यावत्सिंहासनमारोढुमाजगाम तावदपरा पाञ्चालिकाभणत् — ‘भो राजंस्तव सिंहासनसमारुरुक्षा गरीयसी दृश्यते । इदं पुनरासनं विक्रमादित्यसदृश एव समारोढुं प्रभवति । शृणु तस्य गुणान्’ इति । राजा ‘कथय’ इत्याह । पाञ्चालिका कथयति — “एकदा विक्रमो महीं परिभ्रम्य नानादेशान्विलोक्य तृप्तो भूत्वा पुनर्निजनगरीमुज्जयिनीमागच्छत् । तदा नगरवासिनः सर्वे जनाः परममानन्दमवापुः । राजापि स्वशुद्धान्तं प्रविश्य मध्याह्नसमये सुगन्धतैलाक्तः स्नात्वा वस्त्राभरणादिभिरलंकृतः सन्देवमर्चयित्वा,

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ १ ॥
नमो नमः कारणकारणाय नारायणायामितविक्रमाय ।
श्रीशार्ङ्गचक्रासिगदाधराय नमो नमस्ते पुरुषोत्तमाय ॥ २ ॥

इति स्तुत्वा नमस्कृत्य कपिलाभूतिलादीनि नित्यदानानि कृत्वा दीनान्धबधिरकुब्जपङ्ग्वादिभ्यो भूरि दत्त्वा भोजनगृहं प्रविश्यानेकैर्बन्धुभिः समभ्यवजहार । साधु चेदमुच्यते—

एक एव न भुञ्जीत यदीच्छेद्वृद्धिमात्मनः ।
द्वित्रैर्वा बन्धुभिः सार्धं भुञ्जीत मतिमान्नरः ॥ ३ ॥
अभीष्टफलसंसिद्धिरिष्टकाम्यार्थसंपदः ।
द्वित्रैस्तु बन्धुभिः सार्धं भोजनेन प्रजायते ॥ ४ ॥ इति ।

अनन्तरं समानवयोभिः प्रियमित्रैर्गोष्ठीं कुर्वन्नास्त । क्रमेण मरीचिमाली च चरमगिरिशिखरमवततार । अथ राजा समुत्थाय सायन्तनं कर्म परिसमाप्य भोजनानन्तरं शयनगृहं प्रविश्य तत्र शशिकरनिकरप्रभाभासुरपटपरिस्तीर्णे सुरभिकुसुमविसरविकीर्णे विचित्रतरवितानसमुल्लासिते पर्यङ्के सुखं सुष्वाप । प्रभातसमये स्वप्ने स्वयमात्मानं महिषमारुह्य दक्षिणां दिशं गच्छन्तं दृष्ट्वा सहसा प्रबुद्धो विष्णुं स्मरन्समुत्थाय सन्ध्याकर्म समनुष्ठाय सिंहासने स-

मुपविष्टो ब्राह्मणानां पुरतः स्वप्नवृत्तान्तमकथयत् । तच्छ्रुत्वा सर्वज्ञभट्टनामा विप्रवरः प्राह—'राजन्, स्वप्ना द्विविधाः शुभाः अशुभाश्चेति । तत्र शुभाः शुभं फलं प्रयच्छन्ति । अशुभाश्चाशुभफलम् । यत्र गोवृषभकुञ्जरादीनां प्रासादशैलाग्रादीनां चारोहणम्, नितान्तरोदनम्, विष्ठानुलेपनम्, अगम्यागमनं च ते शुभाः । तथा च स्वप्नाध्याये—

आरोहणं गोवृषकुञ्जराणां
प्रासादशैलाग्रवनस्पतीनाम् ।
विष्ठानुलेपो रुदितं नितान्तं
शुभान्यगम्यागमनं तथैव ॥ ५ ॥ इति ।

यत्र तु कण्टकवृक्षादीनामारोहणम्, कार्पासादीनां च दर्शनं तेऽशुभाः । तथा च श्रूयते—

आरोहणं कण्टकवृक्षवाहवै-
र्घुष्ट्रकाणामथ दर्शनानि ।
कार्पासतीव्रोरगपोत्रिशाखा-
मृगादिमानामशुभानि लोके ॥ ६ ॥ इति ।

खरोष्ट्रमहिषव्याघ्रान्स्वप्ने यस्त्वधिरोहति ।
षण्मासाभ्यन्तरे तस्य मृत्युर्भवति निश्चयः ॥ ७ ॥ इति च ।

तथा, स्वप्नस्तु प्रथमे यामे संवत्सरविपाकभाक् ।
द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ॥ ८ ॥
अरुणोदयवेलायां दशाहेन फलं भवेत् ।
गोविसर्जनवेलायां सद्यः स्वप्नफलं भवेत् ॥ ९ ॥ इति ।

किं बहुना ? । राजन्, भवतानुभूतो दुःस्वप्नः । अतोऽनिष्टं फलं ते दद्यात्' इति । तच्छ्रुत्वा राजा 'भो ब्राह्मणास्य दुःस्वप्नस्य कीदृशं प्रायश्चित्तमनुतिष्ठानि ?' इत्यपृच्छत । सर्वज्ञभट्टः प्राह—'भूपाल पुण्यतीर्थे स्नात्वा सवस्त्रालङ्करणः सन्नाज्यावेक्षणं कृत्वा तद्वस्त्रादिकं ब्राह्मणाय देहि । पुनर्नववस्त्राभरणादिकं धृत्वा देवस्याभिषेकं कृत्वा नवभी रत्नैः संपूज्य ब्राह्मणे-

भ्यो गवादिदशदानानि देहि । दीनान्धबधिरकुब्जादिभ्यो भूरि प्रयच्छ । अनेनानुष्ठानेन ब्राह्मणाशीर्वादेन च दुःस्वप्नजातारिष्टं शान्तिमेष्यति ' इति । राजाप्येतत्सर्वज्ञभट्टवचनं श्रुत्वा यथोक्तमनुष्ठाय भूरिदानार्थं दिनत्रयं कोशागारमर्थिसादकरोत् । यथाभिलषितं सर्वे जगृहुः । " इति कथां कथयित्वा पाञ्चालिका राजानमब्रवीत् — ' भो राजंस्त्वय्येवमौदार्यं किं विद्यते ? ' इति । तच्छ्रुत्वा भोजस्तूष्णीं बभूव ॥

इति त्रयोविंशमुपाख्यानम् ।

अथ चतुर्विंशमुपाख्यानम् ।

पुनरपि भोजभूपालं सिंहासनसमारुरुक्षया समागतं सालभञ्जिकापरा समाक्षिप्य समभाषत — ' भो राजन्नस्मिन्सिंहासने समारोढुं विक्रमार्कसदृश एव क्षमः ' इति । राजापृच्छत् — ' कथय तस्य गुणान् ' इति । साब्रवीत् — " महीपाल विक्रमस्य राज्ये पुरन्दरपुरी नाम काचन नगरी समभूत् । तत्र महाधनिकः कश्चिद्वणिगासीत् । तस्य चत्वारः पुत्राः सम्बभूवुः । स वैश्यो मरणसमये चतुरः पुत्रानाहूयावदत् — ' भोः पुत्राः , मयि परेते भवतां परस्परं मैत्री भवेद्वा न वा । तदहमद्यैव भवतां चतुर्णां ज्येष्ठानुक्रमेण विभागं करवाणि ' इति । पुत्राश्च ' यथोचितं क्रियताम् ' इत्यूचुः । ततः पिता यथोचितं विभागं कृत्वा पुत्रान्प्रोवाच — ' अस्य मञ्चस्य चतुर्णां पादानामधश्चत्वारो भागा निक्षिप्ताः तान्ज्येष्ठक्रमेण गृह्णीध्वम् ' इति । पुत्राः ' बाढम् ' इत्यङ्गीचक्रुः । ततः पितरि परलोकं गते चत्वारो भ्रातरो मासमेकत्र वस्तुः । ततः क्रमेण तेषां कलहः समुदियाय । तदा ज्यायानुवाच — ' किमर्थं कोलाहलः क्रियते ? । तातपादैश्चतुर्णां विभागः प्रागेव कृतः । तन्मञ्चाधःस्थितं द्रव्यं गृहीत्वा विभक्ता एव सुखिनस्तिष्ठामः ' इति । अनन्तरं सर्वेऽपि मञ्चपादाधश्चखनुः । तत्र चतुर्णां पादानां तले क्रमशः ताम्रसंपुटानि दृष्टानि । तेषामेकस्य संपुटे मृत्, एकस्याङ्गाराः, अन्यस्यास्थीनि, परस्य पलालं चासीत् । तच्च दृष्ट्वा ते चत्वारः परस्परं विस्मिताः प्रोचुः — ' अहो

अस्मत्पित्रा सम्यगेव विभागः कृतः। परं तु किमत्र निदानमिति न ज्ञायते' इति। अनन्तरं राजसभां प्रविश्य निवेदयामासुः। तच्छ्रुत्वा सभ्या निर्णयं कर्तुं न शेकुः। ततस्ते प्रतिनगरमेत्य प्राज्ञेभ्यो न्यवेदयन्। परं न कोऽपि निर्णेतुं प्रबभूव। अथ चत्वारोऽप्युज्जयिनीं समागम्य विक्रमसभां प्रविश्य वृत्तान्तमकथयन्। तदा विक्रमेनापि विभागार्थो न ज्ञायते स्म। तदनन्तरमेकदा प्रतिष्ठानगरमागतास्ते तत्रत्येभ्यो जनेभ्यो जगदुः। तैरपि निर्णयो न कृतः। ततस्तस्मिन्नेव नगरे कुम्भकारगृहे स्थितः शालीवाहनोऽमुं वृत्तान्तमाकर्ण्य तत्रागत्य भणति स्म— 'भोः सौम्याः किमत्र दुर्बोधमस्ति?। एते चत्वार एकस्यैव पुत्राः। जीवन्नेवैषां पिता ज्येष्ठानुक्रमेण विभागं कृतवान्। अस्य च विभागस्यायमर्थः— 'यतो ज्येष्ठस्य मृत्तिका दत्ता ततः सर्वाऽपि भूमिस्तस्मै दत्तेति ज्ञायताम्। द्वितीयस्य च पलालो दत्तः। तेन सर्वमपि धान्यं तस्मै दत्तम्। तृतीयस्याङ्गारो दत्तः। तेन सर्वमपि सुवर्णं तस्मै दत्तम्। चतुर्थस्य त्वस्थीनि दत्तानि। तेन च सर्वाणि गोधनानि तस्मै दत्तानि' इति। इत्थं शालीवाहनेन कृतं विभागनिर्णयमवधार्य सन्तुष्टाश्चत्वारो भ्रातरः स्वनगरं जग्मुः। विक्रमोऽपीमं विभागनिर्णयं श्रुत्वातिविस्मितः प्रतिष्ठानगरमहाजनान्प्राति पत्रिकामेकां प्रेषयामास— 'स्वस्ति। श्रीमतो यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाख्यषट्कर्मनिरतान्यमनियमादिगुणगणगरिष्ठान्प्रतिष्ठानगरनिवासिनो महाजनान्कुशलप्रश्नपूर्वकं राजा विक्रमो विज्ञापयति— 'भवतां नगरे चतुर्णां वणिक्पुत्राणां विभागनिर्णयो येन कृतः सोऽस्मदन्तिकं प्रेषयितव्यः' इति। ततो महाजना राज्ञा प्रेषितां पत्रिकां समवलोक्य शालीवाहनमाहूयावादिषुः— 'शालीवाहन, राजाधिराजः प्रतापशाली प्रत्यर्थिपृथ्वीपतिसहस्रनमस्कृतचरणसहस्रपत्रः श्रीविक्रमादित्यमहाराजः उज्जयिनीनगरावतंसः सकलार्थिलोककल्पवृक्षः त्वां द्रष्टुमिच्छति। अतस्तत्र त्वया गन्तव्यम्' इति। शालीवाहनः प्राह— 'विक्रमो नाम राजा कियान्?। तेनाहं समाहूतो न गच्छामि। यदि तस्य प्रयोजनमस्ति स्वयमेव स आगच्छतु। मम तदन्तिके किमपि फलं नास्ति'

इति । तच्छ्रुत्वा महाजनाः पत्रिकामुखेन विक्रमाय तदभिप्रायं निवेदयामासुः । ततो विक्रमः पत्रिकां सम्यगवलोक्य कोपानलेन देदीप्यमानविग्रहोऽष्टादशाक्षौहिणीबलेन पुरस्कृतः प्रतिष्ठानगरं समभ्येत्य शालीवाहनाय कमपि दूतं प्रेषयत् । दूतोऽपि शालीवाहनमभ्युपेत्य 'भोः शालीवाहन सकलराजाधिराजो विक्रमस्त्वां समाह्वयति' इत्याह । शालीवाहनः 'नाहमेकाकी विक्रमं द्रक्ष्यामि । चतुरङ्गबलसमेतस्तु समराङ्गणे विक्रमं पश्येयम्' इत्याह । ततो दूतस्तद्वाक्यं राज्ञे न्यवेदयत् । विक्रमश्च तदाकर्ण्य युद्धाय सङ्गराङ्गमाजगाम । शालीवाहनोऽपि कुम्भकारगृहे मृन्मयं हस्त्यश्वरथपादातं मन्त्रेण सजीवं कृत्वा तेन बलेन समराङ्गणमवजगाहे । अनन्तरमुभयोः सैन्ययोः सङ्कुलं युद्धं समभूत् । शालीवाहनसैन्यं सर्वमपि विक्रमेण विनिपातितम् । अनन्तरं शालीवाहनो विक्रमबलमसहमानोऽतिविह्वलश्च संभ्रान्तासमाकुलः 'आपदि मां स्मर' इति पितृदत्तं वरं स्मृत्वा शेषं नागेन्द्रं सस्मार । शेषोऽपि सर्वान्सर्पान्प्रेषयामास । तैराशीविषैर्दष्टमात्रमेव विक्रमसैन्यं निखिलं भूमौ निपपात । ततो विक्रमः समराङ्गणान्निवृत्य स्वसैन्यसमुज्जीवनार्थं तीर्थोदके वर्षमेकं वासुकिं प्रति व्रतमन्वतिष्ठत् । वासुकिश्च प्रसन्नो भूत्वा बभाषे 'भो राजन्वरं वृणीष्व' इति । राजा 'भोः सर्पराज यदि प्रसन्नोऽसि तर्हि भुजङ्गमविषवेगेन मूर्च्छितं मम सैन्यं संजीवय' इति वरमवृणीत । वासुकिरपि तस्मा अमृतघटमेकमदात् । विक्रमस्तं गृहीत्वा सत्वरो यावदाजगाम तावद्ब्राह्मणः कश्चित्समागत्य राजन् 'चिरं जीव' इत्याशिषं प्रायुङ्क्त । ततो राजा 'भो ब्राह्मण कुतः समागतोऽसि' इत्यपृच्छत् । ब्राह्मणः 'प्रतिष्ठाननगरादागच्छामि' इत्याह । 'यत्त्वया याच्यते तदहं दास्यामि' इति राजा प्रतिजज्ञे । ब्राह्मणः 'भवानर्थिजनचिन्तामणिः, यतश्चिन्तितं वस्तु दातुं प्रभवसि । अतो मह्ममयममृतकुम्भः प्रदीयताम्' इत्ययाचत । तच्छ्रुत्वा राजा 'केन भवान्प्रेषितः?' इति ब्राह्मणं पप्रच्छ । ब्राह्मणः 'अहं शालीवाहनेन प्रेषितः' इति प्रत्यवदत् । ततो राजा विचारयामास— 'मया पूर्वमस्मै विप्राय याचितं वस्तु दास्यामीति प्रतिज्ञातम् ।

इदानीं यदि न दीयतेऽपकीर्तिरधर्मोऽपि स्यात् । अतः सर्वथा दातव्यमेव' इति । ब्राह्मणः 'राजन्किं विचार्यते? । भवान्सज्जनः । सज्जनाश्च द्विर्न भाषन्ते । तथा चोक्तम् —

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
भवति तदनृतं वै भाषितं सज्जनानाम् ॥ २ ॥

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुःसहवाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ ३ ॥ इति' ।

ततो राजा 'ब्राह्मण सत्यमाह भवान् । गृह्यताममृतघटोऽयम्' इति तस्मै तं ददौ । सोऽपि राजानं स्तुत्वा निजं स्थानं गतः । विक्रमोऽप्युज्जयिनीमगात् ।" इति पाञ्चालिकाप्रपञ्चितां कथां निशम्य भोजो वाचंयमतामवजगाहे ॥

इति चतुर्विंशमुपाख्यानम् ।

———(*)———

अथ पञ्चविंशमुपाख्यानम् ।

पुनरपि राजा यावत्सिंहासनसमारोहणे सकुतूहलः समाजगाम तावत्पञ्चविंशी पाञ्चालिका प्रहसन्ती प्रतिषिध्य भूपतिं प्राह — श्रूयतां राजन् । "विक्रमादित्ये राज्यं कुर्वति कश्चिज्ज्यौतिषिकः समागत्य,

सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः शुभं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं
नित्यं भूतिकरा भवन्तु भवतः सर्वेऽनुकूला ग्रहाः ॥ १ ॥

इत्याशिषमुक्त्वा पञ्चाङ्गानि प्रपञ्चयामास । राजा पञ्चाङ्गं श्रुत्वा ज्यौतिषि-

कमपृच्छत्—'भो दैवज्ञ कीदृशमेतत्संवत्सरफलम् ?' इति । दैवज्ञः प्राह—'अस्मिन्संवत्सरे राजा रविः । मन्त्री मङ्गलः । धान्याधिपतिः शनिः । किं च शनैश्चरो भौमश्च रोहिणीशकटं भित्त्वा यास्यतः । तस्मात्सर्वथानावृष्टिर्भविष्यति । उक्तं च वराहमिहिरेण—

अर्कसुतेन हि भग्ने भूमिसुतेनापि रोहिणीशकटे ।
द्वादश चाब्दानि हि न हि वर्षति वर्षाणि वारिदो नियतम् ॥ २ ॥
यदा भिनत्ति मन्दोऽयं रोहिण्याः शकटं तदा ।
वर्षाणि द्वादशात्यन्तं वारिवाहो न वर्षति ॥ ३ ॥ इति ।

इत्थं दैवज्ञवचनमाकर्ण्य राजानावृष्टिनिवारणार्थं कमप्युपायं तमपृच्छत् । ततो दैवज्ञः प्राह—'सूर्यादीन्नव ग्रहानुद्दिश्य कल्पोक्तप्रकारेण होमोऽनुष्ठितश्चेदनावृष्टिस्तेषामनुग्रहेण निवर्तेत' इति । अनन्तरं विक्रमः श्रोत्रियान्ब्राह्मणानाहूय तेभ्यः पूर्ववृत्तान्तमुक्त्वा तैर्होमं कारयितुमुपाक्रमत । होमसामग्री सर्वापि संपादिता । ब्राह्मणैः कल्पोक्तप्रकारेण नवग्रहहवनमपि कृतम् । होमसाद्गुण्यार्थं पूर्णाहुतिरपि निर्वर्तिता । दिव्यवस्त्राभरणादिना ब्राह्मणास्तोषिताः । भूरिदानेन दीनान्धबधिरादयश्च संतुष्टा बभूवुः । तथापि वृष्टिर्न बभूव । सर्वेऽपि लोकास्तयानावृष्ट्या परमं क्लेशं ययुः । राजापि तेषां क्लेशेन स्वयं क्लेशितः सन्कदाचिद्यज्ञशालायामुपविश्य चिन्ताकुलः समभवत् । तदा काचिदशरीरिणी वागेवमुदपद्यत—'राजन्यदि वृष्टिमभिलषसि तर्हि पुरः स्थितदेवालयवासिन्या आशापूरणीसमाख्याया देवतायाः पुरो द्वात्रिंशल्लक्षणलक्षितस्य महापुरुषस्य कण्ठरुधिरेण बलिं देहि । ततो वृष्टिर्भविष्यति' इति । तच्छ्रुत्वा राजा देवालयं गत्वा देवतां नमस्कृत्य कण्ठे खड्गं न्यदधात् । तावत्सा देवता प्रत्यक्षीभूय राज्ञो हस्तं गृहीत्वा 'भो महावीर महतानेन तव धैर्येण प्रसन्नास्मि । ईप्सितं प्रार्थयस्व' इत्यभ्यभाषत । राजापि 'देवि यदि प्रसन्ना भवती तदेमामनावृष्टिं निवारय' इति प्रार्थयांचक्रे । अनन्तरं देवता 'तथा करिष्यामि' इत्यभिधायान्तरधात् । तदनन्तरमेव महती वृष्टिः प्रादुरभूत् । लोकाश्च सन्तुष्टा बभूवुः" इति कथां पा-

ञ्चालिकाप्रपञ्चितां समाकर्ण्य धाराधिपतिर्भोजो निवृत्ताशो वाचंयमो बभूव ॥

इति पञ्चविंशमुपाख्यानम् ।

——(*)——

अथ षड्विंशमुपाख्यानम् ।

भूयोऽपि कदाचित्समुपजातकुतूहले धाराधरणीधुरन्धरे सिंहासनं समधिरोढुं समुपागते कापि पाञ्चालिका सोपहासमेवं जगाद — "महीपाल किमेवं निवृत्ताशो गतोऽपि पुनरिदं विक्रमीयं भद्रासनं समधिरोढुं समुपागतोऽसि? । अद्यापि शृणु तस्य महिमानम् । स हि भूपालः शौर्यौदार्यधैर्यादिषु गुणेषु देवराजमप्यतिशेते । अन्यच्च, यदुक्तं तदन्यथा न करोति । यच्चित्ते तिष्ठति तदेव वदति । यद्वाचा वदति तदेव कर्मणा करोति । अतः साधुतमोऽयं विक्रममहीपतिः । उक्तं च—

यथा चित्तं तथा वाचा यथा वाचा तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ १ ॥
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् ॥ २ ॥ इति ।
उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं यथेन्दोः शिशिरो गुणः ॥३॥ इति च ।

अथैकदा सुरनगर्यां भद्रासनमलंकुर्वाणे सहस्राक्षे, अष्टादश सहस्राणि महर्षयः, त्रयस्त्रिंशत्कोटयो देवाः, अष्टौ लोकपालाः, एकोनपञ्चाशन्मरुद्गणाः, द्वादशादित्याः, चन्द्राङ्गारकादयो नव ग्रहाः, नारदादयो दिव्यर्षयः, मेनकाप्रभृतयोऽप्सरसः, सर्वे गन्धर्वादयो गणाश्च तमसेवन्त । तदानीं च नारदः 'विक्रमसदृशः परोपकारी महासत्त्वसंपन्नो वा नरपतिर्भूमण्डले नास्ति' इति सभायां प्रस्तावादाह । तदाकर्ण्य सा सभा परमं विस्मयमाययौ । तदा कामधेनुराबभाषे — 'भोः सभ्याः किमत्र विस्मयनीयमस्ति? । यतः,

दाने तपसि वीर्ये च विज्ञाने विनये नये ।
विस्मयो नैव कर्तव्यो बहुरत्ना वसुन्धरा ॥ ४ ॥

तथा च, वाजिवानरलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोयानामन्तरा महदन्तरम् ॥ ५ ॥' इति ।

ततो देवराजः कामधेनुमभाषत — 'सुरभे मर्त्यलोकं गत्वा विक्रमस्य परोपकारादीन्गुणान्सम्यगवगम्य मम निवेदय' इति । अथ सा सुरभिर्मर्त्यलोकं समागत्य विक्रमार्कस्य हृदयपरीक्षार्थं कुत्रापि तदागमनमार्गे दुर्बला सती महापङ्के निमग्ना परमं विषादमभिनयन्ती समभूत् । विक्रमोऽपि तामालोक्य सहसा स्वदेहाभिमानमपहाय दुरवगाहे पङ्के प्रविश्य स्वयमेव तां पङ्कादाकृष्य तीरं नीत्वा प्रक्षाल्य शनैर्घासमुष्टिं दत्त्वा कण्डूयनादिभिरुपचचार । ततः सुरभिर्निजरूपं धृत्वा प्रसन्नचित्ता सती 'राजन्प्रीतास्मि तवानेनोपचारेण । ईप्सितं प्रार्थयस्व' इति व्याजहार । राजापि 'यदि प्रीतासि तर्हि निजरूपेण मम गृहे सर्वदा निवस' इति प्रार्थयत । सापि तथेत्युक्त्वा तदाप्रभृति विक्रमवशगा बभूव । अथ कदाचित्कश्चिद्विप्रः समागत्य विक्रमायाशिषं प्रयुज्यावादीत् —

'राजन्सर्वानहं याचे न मां कश्चन याचते ।
अहो दैवविपाकोऽयमीश्वराणामपीश्वरः ॥ ६ ॥' इति ।

तदाकर्ण्य राजा 'भूसुर किमिदानीं मया कर्तव्यम्' इत्यपृच्छत् । अनन्तरं विप्रवरः 'भो राजन्, बहोः कालादहं याच्ञयैव महद्दुःखमन्वभूवम् । पुरुषस्य याच्ञासदृशमन्यल्लाघवकरं न पश्यामि । तथा च वदन्ति—

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥ ७ ॥ इति ।

अत इतः परं यथा मम याच्ञादुःखं न भवेत्तथानुग्रहः कर्तव्यः' इति प्रार्थयांचक्रे । ततो राजा पर्यालोच्य तां कामधेनुं तस्मै प्रादात् । सोऽपि राजानं स्तुत्वा धेनुं गृहीत्वा निजभवनमयासीत् ।" इति कथां प्रपञ्च्य पाञ्चालिका भोजभूपमपृच्छत् — 'किमेवंविधमौदार्यं त्वयि विद्यते ?' इति । तच्छ्रुत्वा भोजो मूको बभूव ॥

इति षड्विंशमुपाख्यानम् ।

———(*)———

अथ सप्तविंशमुपाख्यानम् ।

पुनरप्येकदा समागतं भोजभूपालं काचित्सालभञ्जिका निवार्य व्याजहार— "राजञ्छ्रूयताम् । विक्रममहीपतिः कदाचिन्महीपर्यटनार्थमुज्जयिन्या निर्गत्य बहून्देशान्सकुतूहलः परिक्रम्य नगरमेकमगमत् । तत्रत्या जनाः स्वस्ववर्णाश्रमधर्मानुष्ठानतत्पराः सदाचारवन्तोऽतिथिपूजापरायणाः परमदयालवश्चासन् । विक्रमोऽपि तत्र 'पञ्च दिनानि स्थास्यामि' इति मन्वानस्तन्नगरस्थमतिमनोहरं देवालयं गत्वा देवं प्रणम्य रङ्गमण्डपमध्यास्त । तत्रान्तरे राजकुमार इवातिमनोहररूपो दुकूलवस्त्रधारी नानालङ्करणालंकृतः कर्पूरकुङ्कुमागरुमृगनाभिसुगन्धमिलितचन्दनानुलिप्ततनुः कश्चित्पुरुषो गणिकाभिः साकं तत्रागत्य नानाविधाः क्रीडाकथाः कथयन्कञ्चित्कालमपनीय ताभिः सार्धं यथागतं जगाम । राजापि तं दृष्ट्वा 'कोऽयम्?' इवि विचारयन्नासीत् । परेद्युः स एव पुरुष एकाकी दीनवदनो वस्त्राभरणरहितः कौपीनमात्रशेषः समागत्य रङ्गमण्डपे पपात । तदा राजा तं दृष्ट्वा समुपजातसन्तापः पृच्छति स्म— 'भोः, पूर्वेद्युर्वस्त्राभरणादिना समलंकृतशरीरो राजकुमार इव वेश्याभिः सह समागतः । अद्य पुनरेवं दृश्यसे । किमेतत्?' इति । पुरुषः प्राह— 'भो महापुरुष किमेवं पृच्छसि? । अहं पूर्वेद्युस्तथैव स्थितः । इदानीं दैवयोगादेवं तिष्ठामि । कर्मणा नियमितः को वा जन्तुः कष्टं नानुभवति? । ब्रह्मादयोऽपि हि कुलालादिवत्कर्मणा सृष्ट्यादौ नियमिताः कष्टमनुभवन्ति ।' इति । ततो राजा तं विवेकिनं मन्यमानस्तद्वृत्तान्तं सम्यगवगन्तुमभिलषन्पप्रच्छ— 'को भवान्?' इति । पुरुषः 'कितवोऽहम्' इत्याह । राजा 'किं द्यूतक्रीडां जानासि?' इत्यपृच्छत् । पुरुषः 'दुरोदरेऽहमेव निपुणो नान्यः' इत्याह । राजा 'त्वमतीव विवेकी दृश्यसे । कथं तव पापमूले द्यूते प्रवृत्तिरभूत्?' इति पुनरपृच्छत् । पुरुषः प्राह— 'प्राज्ञोऽपि पुरुषः कर्मणा प्रेर्यमाणः किं वा न कुर्यात्?' इति । राजा 'सत्यमेवैतत् । तथापि विवेकिना पुरुषेण महापापमूले द्यूतादौ बुद्धिर्न कार्या । कर्म हि द्विविधम्— सुकृतं दुष्कृतं चेति । तत्र सुकृतकर्म सुखं

जनयति । दुष्कृतं तु दुःखं बहुभिः प्रकारैरुत्पादयति । न तु महापापमूलभूतेषु द्यूताद्यकार्येष्वपि विवेकवन्तं पुरुषं प्रेरयितुं शक्नोति । बुद्धिमता हि पुरुषेण 'इदं कार्यम्' 'इदमकार्यम्' इति विविच्य कार्ये प्रवर्तनीयमिति सनातनो धर्मः । अकार्यकरणेन च पुरुष एवापराध्यति । न तु कर्म । अत इतः परमेतादृशं कर्म परित्यज्य विहितं कर्म समनुष्ठाय पुण्यां गतिमभिगन्तुं यतस्व । अन्यथा तव पातित्यं भवेत् । तथा चोक्तम्—

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ १ ॥ इति ।'

इत्थं राज्ञो वचनमाकर्ण्य स कितवः 'भो महापुरुष यदुक्तं भवता तद्युक्तमेव । तथापि महादारिद्र्यपीडितस्य ममैतदेवैयन्तं कालं जीवनमासीत् । यदीतः परमेतत्त्यक्ष्यामि तर्हि मम कुटुम्बभरणं दुष्करं भवेत् । अतो मयि कृपया कमपि धनार्जनोपायं न्याय्यमुपदिशतु भवान्' इत्याह । अस्मिन्नवसरे वैदेशिकौ द्वौ ब्राह्मणौ समागत्य तस्यैव रङ्गमण्डपस्यैकदेशे समुपविष्टौ परस्परं सम्भाषमाणावास्ताम् । तत्रैको राजानं प्राह— 'मयास्य देवालयस्य पश्चिमप्राकारभित्तौ पिशाचलिप्या लिखितान्यक्षराण्यवलोकितानि । तत्रैवं वर्णावलिर्भवति । अस्य देवालयस्येशानदिग्भागे पञ्चधनुःप्रमाणे श्वभ्रे धनरत्नादिपूरितं घटत्रयमस्ति । तत्समीपे कापि भैरवप्रतिमास्ति । यस्तु महापुरुषः स्वकण्ठरुधिरेण तां प्रीणयति तस्मै तद्घटत्रयं सा दद्यात्' इति । अतस्त्वं तत्र गत्वा कण्ठरक्तेन भैरवमभिषिच्य घटत्रयं गृहाण' इति । ततो विक्रमस्तत्र गत्वा स्वकण्ठरुधिरेण भैरवमभिषिषेच । भैरवोऽपि परां सन्तुष्टिमवाप्य तस्मै घटत्रयं प्रादात् । सोऽपि तत्कितवाय दत्त्वा तेन श्लाघितो निजनगरीमुज्जयिनीमाजगाम । " इति कथां श्रुतिमनोहरां पाञ्चालिकाप्रकथितां श्रुत्वा धाराधुरन्धरो निरुत्साहो निवृत्तः ॥

इति सप्तविंशत्युपाख्यानम् ।

——(*)——

अथाष्टाविंशमुपाख्यानम् ।

पुनरपि भोजः कदाचन भद्रासनमधिरोढुकामः पाञ्चालिकामस्तके पादं निधातुं यावदुपचक्रमे तावदष्टाविंशतितमा सा तं निराकृत्य व्याजहार — यद्यपि भवान्महीपालः । तथापि विक्रमीयमिदं भद्रासनमधिरोढुं नार्हति । शृणु तस्य महिमानम् । "स हि भूपालमणिः कदाचिद्गङ्गास्नानेनात्मानं पावयितुं समित्रबान्धवः सपरिवारश्च स्वनगरात्प्रस्थाय पादचारेण गच्छन्मार्गवशादस्तमयकाले नगरमेकमगमत् । तस्य समीपे निर्मलोदका कापि तरङ्गिणी प्रवहति । तस्याश्च तीरे नानाविधतरुषण्डमण्डितं काननमेकमपश्यत् । तस्य च मध्ये समुत्तुङ्गगोपुरप्राकाररमणीयं किमपि देवायतनमद्राक्षीत् । ततः सर्वैर्बान्धवैर्मित्रैः परिजनैश्च सह तत्र निविश्य स्वयं नद्यां स्नात्वा सायन्तनं कर्मकलापं समनुष्ठाय देवायतनं गत्वा देवं प्रणम्य वैदिकैः स्तोत्रैः स्तुत्वा परमानन्दभरितः स्वजनैः सह रात्रौ तत्र न्यवसत् । तदा वैदेशिकाश्चत्वारस्तत्र समागम्य राजसमीपे समुपविविशुः । राजा च तानप्राक्षीत्— 'कस्माद्देशाद्भवन्तः समागताः?' इति । तेषु कश्चिदुवाच — 'पूर्वदेशादागच्छामः' इति । ततो राजा 'तत्र युष्माभिर्यत्किंचिदद्भुतमपि दृष्टम्?' इत्यपृच्छत् । ते चैवं प्रत्यूचुः — 'सुमुख तत्र महदाश्चर्यमस्मन्नयनगोचरं समभूत् । श्रूयताम्— तत्र हि देशे वेतालपुरी नाम काचन नगरी वर्तते । तस्यां च शोणितप्रिया नाम कापि देवतास्ति तत्रत्या महाजनाः प्रतिवत्सरं स्वमनोरथसिद्ध्यर्थं तस्यै पुरुषोपहारं प्रयच्छन्ति । तेषां राजाप्येतदनुमन्यते । तस्मिन्दिने यः कोऽपि वैदेशिकस्तत्र समायाति यदि तमेव देवतायाः पुरो बलिपशुमिव समर्पयन्ति । वयमपि तस्मिन्नेव दिने मार्गवशात्तां नगरीं प्राप्ताः । तत्रत्या अस्मानुपहर्तुमयतन्त । तां च तेषां प्रवृत्तिं कर्णाकर्णिकया समाकर्ण्य वयं प्राणत्राणपरायणाः कथमपि पलायनमेव शरणं मन्यमानाः अत्र समागताः स्मः' इति । तच्छ्रुत्वा राजा विक्रमस्तत्र गत्वा देवतायतनमतिभयङ्करं विलोक्य देवतां नमस्कृत्य स्तुत्वा च स्तुतिभिस्तस्यैव रङ्गमण्डपे तस्थौ । तस्मिन्समये कश्चिद्दीनवदनो वैदेशि-

को महाजनैर्वाद्यपुरःसरं बलादाकृष्य नीयमानो राज्ञा ददृशे । राजापि तं दृष्ट्वा स्वमनसि विचारयति स्म — ‘अयं वध्यभूमिमेव जनैरानीयमानः प्रतिभाति । अत एवातीव दीनवदनो दृश्यते । अस्मिन्समये मम शरीरेण देवतां प्रीणयित्वामुं मोचयिष्यामि । इदं च मम शरीरं शतं वर्षाणि स्थित्वापि नाशमेव यास्यति । इदानीं वैदेशिकार्थे शरीरं यदुपयुज्यते शाश्वतो धर्मः कीर्तिश्च स्याताम् । उक्तं च —

चला लक्ष्मीश्चलाः प्राणाश्चलो देहश्चलं वयः ।
चलोऽपि चायं संसारः कीर्तिधर्मौ तु निश्चलौ ॥ १ ॥ इति ।
नरः पतितकायोऽपि यशःकायेन जीवति ॥ इति च ।

अतोऽवश्यमिदानीं स्वशरीरविनियोगः कार्यः ।’ इति । एवं विचार्य महाजनानुपेत्य पप्रच्छ — ‘दीनवदनोऽयं वैदेशिकः कुत्र नीयते ?’ इति । जनाः प्रोचुः — ‘अमुं देवताबलिनिमित्तं नयामः’ इति । राजा ‘अस्योपहरणे किं कारणम् ?’ इति पुनरपृच्छत् । महाजनाः ‘देवतानेन पुरुषोपहारेण प्रीता सत्यस्मन्मनोरथं पूरयिष्यति’ इति प्रत्यूचुः । राजा प्राह — ‘भो महाजनाः, [illegible] । परं भीतश्च । अस्योपहारेण देवतायाः का नाम तुष्टिर्भविष्यति ? । अतोऽमुं मुञ्चन्तु भवन्तः । अहमपि वैदेशिक एव । पुष्टाङ्गश्चास्मि । ममोपहारेण देवतातीव तुष्टा भवेत् । तस्मान्मां तत्र नयत’ इति । ततस्तेऽपि भीतं वैदेशिकं मुक्त्वा राजानं देवतासमक्षं निन्युः । राजापि प्रसन्नमुखः स्वयमेव देवतां प्रीणयितुं कण्ठे यावत्खड्गं चिक्षेप तावद्देवता परं सन्तुष्टा तत्करस्थं खड्गाग्रं समाक्षिप्य जगाद — ‘भो महासत्त्व तवानेन धैर्येण परोपकारशीलतया चातीव प्रसन्नास्मि । ईप्सितं प्रार्थयस्व’ इति । ततो राजा ‘देवि यदि प्रसन्नासि तदद्यप्रभृति पुरुषमांसोपहारं वर्जयस्व’ इति प्रार्थयामास । देवतापि तथेत्युक्त्वान्तरधात् । अथ महाजनाः सानन्दभरितहृदयाः ‘महापुरुष को भवान् ? कश्च देशो भवता भूष्यते ?’ इति राजानं पप्रच्छुः । राजा ‘विक्रमार्कमेवं मां वदन्ति । उज्जयिनी नगरी मे निवासः’ इति प्रत्युवाच ।

तच्छ्रुत्वा पूर्वमेव विदिततन्महिमानस्ते महाजनाः प्रीतेः परां काष्ठामधिरुह्य विक्रमं बहुभिः प्रकारैः संपूज्य कानिचिद्दिनानि तत्रैव वस्तुं प्रार्थयामासुः । सोऽपि तेषां प्रार्थनामनुरुध्य तत्र द्वित्राणि दिनान्युषित्वा ततो निर्गत्य स्वबन्धुमित्रपरिजनाः पूर्वं यत्र स्थापितास्तन्नगरमागम्य तैः सह वाराणसीं प्राप्य समीहितं गङ्गास्नानादिकं समनुष्ठाय क्रमेणोज्जयिनीमागमत् ।" इति पाञ्चालिकया प्रपाञ्चितां कर्णयोरमृतधारावर्षिणीं कथां श्रुत्वा भोजो मौनी बभूव ॥

इत्यष्टाविंशमुपाख्यानम् ।

———(*)———

अथैकोनत्रिंशमुपाख्यानम् ।

भूयोऽपि कदाचित्समागतं भोजराजमपरा पाञ्चालिका निवार्य व्याजहार— नेदं भद्रासनमधिष्ठातुमर्हति भवान् । श्रूयतां विक्रमार्कस्य महिमा । "स हि निखिलभूपालमौलिलालितपादकमलो महीपालमणिरेकदा समानवयोभिः स्वमित्रैश्च राजकुमारैः संसेव्यमानः सभायामुपविवेश । तदा च कश्चन स्तुतिपाठकः समागत्य तं प्रणम्य,

यावत्स्थास्यति पृथ्वीयं यावच्चन्द्रदिवाकरौ ।
तावत्पुत्रैश्च पौत्रैश्च भुङ्क्ष्व राज्यं महीपते ॥ १ ॥

इत्याशिषमभिधाय,

यथा तोयं समाकाङ्क्षन्मयूरो ग्रीष्मपीडितः ।
प्रतीक्षेत पयोवाहं तथाहं तव दर्शनम् ॥ २ ॥

देव कल्पतरुच्छायामाश्रितोऽस्म्यद्य भूपते ।
इतः परं कुतो दैन्यं धन्यो नान्योऽस्ति मद्भुवि ॥ ३ ॥

राजन्सर्वस्वदातारं भवन्तं पश्यतो मम ।
हृदयं गाहते भूपं तं वदान्यशिरोमणिम् ॥ ४ ॥

इति बहुभिः प्रकारैस्तुष्टाव । तच्छ्रुत्वा विक्रमः 'मद्दर्शनेन कस्ते स्मृतिपथमधिरूढः ?' इति पप्रच्छ । वन्दी प्राह— 'राजन्, अस्ति हिमवदुत्तरभागे जम्बीरनगरे धनेश्वरो नाम कश्चिद्भूपालमणिः । स तावदर्थिनां द्रु-

रिद्र्यं निवार्य सर्वान्धनपतीन्करोति । एकदा तेन धनेश्वरेण माघशुद्धसप्तम्यां वसन्तपूजा विहिता । तत्र दानार्थमष्टादशकोटिसुवर्णं परिकल्पितवान् । एतादृशौदार्यगुणगरिष्ठः स राजा तत्र राजते । अस्मिन्देशे पुनर्भवांस्तादृशगुणो मया दृष्टः । अतस्तव दर्शनेन मम तस्य स्मरणं सञ्जातम्' इति । तच्छ्रुत्वा विक्रमो भाण्डारिकमाहूयैवं समादिशत्—'अमुं भाण्डारं नीत्वा दिव्यान्यनेकानि रत्नानि ग्राहय' इति । ततः कोशाध्यक्षस्तं वन्दिनं भाण्डारं नीत्वा दिव्यान्यनेकानि रत्नान्यदर्शयत् । स्तुतिपाठकोऽपि स्वेप्सितान्यष्टौ रत्नानि गृहीत्वा परिपूर्णमनोरथो राजसमीपमागत्य भणति स्म—'देव भवत्प्रसादादहं धनपतिर्जातोऽस्मि । अद्य नवापि निधयो मम हस्तगता इव । हिरण्यगर्भादयोऽपि भवत्तुलां नाधिरोहन्ति' इति । एवं स्तुत्वा 'ब्रह्मायुर्भव' इत्याशिषमभिधाय निजनिवासमयासीत् ।" इति कथां कथयित्वा पाञ्चालिका भोजमपृच्छत्—'किमेतादृशमौदार्यं त्वयि पश्यसि?' इति । तच्छ्रुत्वा राजा निरुत्तरो बभूव ॥

इत्येकोनत्रिंशमुपाख्यानम् ।

———(*)———

अथ त्रिंशमुपाख्यानम् ।

भूयोऽप्येकदा भद्रासनमधिरोढुमभिलषन्तं धारामहीपालमन्या प्रतिमा निषिध्याभणत्—महीपाल विक्रमस्यौदार्यं श्रूयतां प्रथमम् । पश्चाद्यदि रोचते तर्हि तदीयमिदं भद्रासनमधिरुह्यताम् । "एकदा स विक्रमोऽमात्यमुख्यैर्बहुभी राजकुमारैः सामन्तभूपैश्चोपसेव्यमानः सिंहासनमलंकुर्वाणोऽभवत् । तदा कश्चिदैन्द्रजालिकः समागत्य तं प्रणम्य जगाद—'देव सकलकलाभिज्ञस्य तव सभामागत्य बहव ऐन्द्रजालिका निजकौशलमदर्शयन् । तन्ममापि कौशलं प्रसन्नेन चेतसा विलोकयितुमर्हसि' इति । राजा 'नेदानीमवसरोऽस्माकम् । स्नानसमयः संप्राप्तः । अतः श्वः प्रभाते तव कौशलं द्रक्ष्यामः' इत्याह । सोऽपि तथा करोमीति प्रतिश्रुत्य यथागतं गतः । परेद्युश्च प्रभाते राजा विक्रमस्तत्कालोचितं सर्वं नित्यकर्म परिसमाप्य कैश्चि-

दिष्टमित्रैः सह शरीरवृत्तिं निर्वर्त्य नानामरकतमणिमाणिक्यादिभिरलंकृतः सकल-
सामन्तमहीपालैः स्वमन्त्रिवर्गैः पुरोहितादिभिश्च संसेवितः सुवर्णमणिमयीं
सभां प्रविश्यामरपरिवृतपुरन्दर इवेदं महासनमालम्ब्य तस्थौ । तदैन्द्रजालिकः समा-
गमत् । सोऽप्याहूतो महाकायो महाश्मश्रुर्दीप्यमाननयनो दक्षिणे
हस्ते खड्गं धृत्वातिमनोहररूपलावण्यसंपन्नां कामपि कमललोचनां प-
रिगृह्य सभामण्डपं प्रविश्य राजानं प्रणम्य तस्थौ । तदा सर्वे सामाजिका-
स्तं सविस्मयमप्राक्षुः । अप्राक्षुश्च ‘को भवान् ? कुतस्त्यः ?’ इति च । ऐ-
न्द्रजालिकः ‘अहं महेन्द्रसेवकः । कस्मिंश्चिदपराधे महेन्द्रेण शप्तो भूमौ
वसामि । इयं च मम प्रेयसी । अद्य नाकलोके देवानां पूर्वदेवानां च मह-
द्युद्धं प्रवर्तते । मया तत्र गन्तव्यम् । अयं च विक्रमभूपालः परनारीसहो-
दर इत्यश्रौषम् । अतोऽहमस्य सविधे प्रियामिमां निक्षिप्य गन्तुमभिलषामि’
इति । तच्छ्रुत्वा परमाद्भुताविष्टचेता विक्रमः कथमप्यङ्गीचकार । सोऽपि वि-
क्रमहस्ते प्रणयिनीं समर्प्य तं प्रणम्य झटिति गगनमुत्पपात । तावदाकाशे
‘रे मारय घातय’ इत्येवं घोरतरा वागश्रूयत । सर्वेऽपि सभ्या युगपदुन्न-
मितवदनाः सकौतुकमपश्यन् । तदनन्तरं मुहूर्तात्परं राजसमक्षे कृपाणं व-
हन्रुधिरधारारूषितश्च बाहुरेको दिवः पपात । राजापि तद्विलोक्य सभ्या-
नवादीत् ‘महानयं वीरः सङ्ग्रामे प्रतिभटैर्न्यपात्यत । तस्यैकः सखड्गो बा-
हुरत्र पतितः’ इति । अत्रान्तरे कबन्धो न्यपतत् । अनन्तरं शिरोऽप्यपतत् ।
तद्दृष्ट्वा सा वनिता सकरुणं राजानमवादीत् — ‘देव मम भर्ता समराङ्गणे
युध्यमानः शत्रुभिर्निहतः । तस्यायं कबन्धः सखड्गोऽयं बाहुरिदं शिरश्च । अतो
मम भर्तारं यावदमरस्त्रियो न वृण्वते तावदहं गमिष्यामि । दीयतां ममा-
ग्निः’ इति । एवं तस्या वचनं श्रुत्वा राजाब्रवीत् — ‘अयि पुत्रि किम-
र्थमग्निं प्रवेक्ष्यसि ? । त्वामहं निजतनयामिव परिपालयिष्यामि । रक्षस्व
शरीरम्’ इति । वनिता प्राह — ‘देव सर्वज्ञेन भवतापि किमेवमभिधीय-
ते ? । यदर्थमेतच्छरीरं स मे स्वामी दशामिमामनुभवति । इतः परं कस्य

कृते शरीरमिदं रक्षिष्यामि ? । ‘प्रमदाः पतिवर्त्मगाः’ इत्ययं सनातनः स्त्रीणां धर्मः । तथा हि वदन्ति —

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥ १ ॥ इति ।
मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
सारुन्धतीसमा प्रोक्ता स्वर्गलोके महीयते ॥२॥ इति स्मृतिश्च ।

किं च, वैधव्यसदृशं दुःखं स्त्रीणामन्यन्न विद्यते ।
धन्या सा योषितां मध्ये भर्तुरग्रे म्रियेत या ॥ ३ ॥

अतोऽवश्यमिदानीमग्निं प्रवेक्ष्यामि’ । एवमभिधाय हुताशनदानाय राज्ञः पादयोः पपात । राजापि पतिभक्तिपवित्रं तस्या वचनं श्रुत्वा करुणारसार्द्रान्तःकरणः श्रीखण्डादिभिश्चितां विरचय्य तामनुजज्ञे । सापि राज्ञोऽनुज्ञामवाप्य भर्तृशरीरेण सह पावकं प्रविवेश । ततः सूर्योऽपि संकुचितकरसहस्रश्चरमगिरिगह्वरमवजगाहे । राजापि सायन्तनं कर्मकलापं निर्वर्त्य क्रमेण तां निशामनैषीत् । अथ प्रभाते तिग्मभानावुदयमहीधरशेखरायिततनौ राजा सिंहासनोपविष्टः सकलसामन्तसमूहप्रणतीर्यावदङ्गीकुर्वन्नास्त तावत्स वीरो यथापूर्वं खड्गहस्तो देदीप्यमानविग्रहो नभःस्थलादवतीर्य राज्ञः कण्ठे सुरतरुकुसुमनिर्मितां परिमललुब्धमधुकरनिकुरुम्बनिरन्तरामम्लानां दिव्यमालां समर्प्य महेन्द्रसन्देशं तस्मै निवेद्य नानाविधाःप्रवचनानुबद्धाः कथाः कथयितुमुपचक्रमे । तदा सर्वापि सभा विस्मिता बभूव । वीरोऽवदत् — “अहमितो निर्गत्य नाकलोकं गतः । तत्र देवानां दानवानां च सङ्ग्रामः प्रवृत्तः । तत्र च मया बहवो दानवा निपातिताः । केचन कान्दिशीका आसन् । समाप्ते च सङ्ग्रामे भगवान्सहस्राक्षः सर्वैर्देवैः सह सप्रसादं मामवलोक्य जगाद—‘अहो वीर चिराद्दृष्टोऽसि । एतावन्तं कालं कुत्र स्थितोऽसि ?’ इति । ततोऽहमवादिषम् — ‘स्वामिनः शापादियन्तं कालं भूलोके स्थितः । अद्य स्वामिनो दैत्यैः सह युद्धं प्राप्तमाकर्ण्य साह्यार्थमागतोऽस्मि’ इति । ततो महेन्द्रः प्रसन्नचित्तः ‘अयं वीरायं युद्धवृत्तान्तस्त्वया मध्यमलोके मा

प्राप्नोतु । अद्य तव शापावसानमभूत् । परं प्रसन्नोऽस्मि । गृहाणेदं कनकवलयम् ।' इत्यभिधाय स्वकरात्कनकवलयमुन्मुच्य मम हस्ते स्वयमेवाकलयांचकार । पुनरहं व्यजिज्ञपम् — 'भोः स्वामिन्नहं मर्त्यलोकभूषणे विक्रमहीपाले भार्यां निक्षिप्य समागतोऽस्मि । तस्मात्पुनस्तत्र गत्वा भार्यां गृहीत्वा समागन्तुमनुजानातु मां देवः' इति । महेन्द्रोऽप्यनुजज्ञे । ततस्त्वरया समागतोऽस्मि । झडिति मया तत्र गन्तव्यम् । कुत्र मे भार्याऽस्ति" इति । तच्छ्रुत्वा परं विस्मयमापन्नो राजा तूष्णीं स्थितः । तदा स ऐन्द्रजालिकः 'किमिति जोषमास्यते?' इत्यपृच्छत् । तदा सभ्यः कश्चिदाह— 'तव भार्याग्निं प्रविष्टा' इति । ऐन्द्रजालिकः 'हन्त किमेतत्?' इति पप्रच्छ । तदा सभ्याः परस्परवदनानि विलोकयन्तो निरुत्तरा बभूवुः । ऐन्द्रजालिको राजानमधिक्षेप्तुमारेभे— 'राजावतंस परदारसहोदरः सकलार्थिलोककल्पतरुरिति प्रसिद्धिं प्राप्य मम प्राणप्रियामन्तःपुरे सङ्गोप्य किमेवं तूष्णीं स्थितोऽसि?' इति । राजापि संकुचितमनाः शुद्धान्तचरान्सौविदल्लानाहूयापृच्छत् — 'सौविदल्लाः सत्यं ब्रूत । किमस्य दयितान्तर्वर्तते?' इति । सौविदल्लाः 'स्वामिन्नस्मज्जनन्या देव्या संलपन्ती सुखमास्ते' । इत्यूचुः । राजा 'तर्हि तामत्रानयत' इत्याह । ततस्ते महाप्रसाद इति सत्वरमन्तःपुरं प्रविश्य तामानिन्युः । राजा तां दृष्ट्वा सामाजिकैः सह परमं विस्मयमवाप । अत्रान्तरे स वीरः स्मित्वा राजानमस्तौषीत् — 'जय महाराज । जय सकलमहीपालमकुटकोटिमाणिक्यमणिकिरणपाटलितपादपीठ । जय निरर्गलदानोदकधारापूरप्लवमाननिखिलमार्गण । जय चोज्जयिनीभाग्यपरिणाम । अहमैन्द्रजालिकः मयैवमिन्द्रजालविद्यालाघवं प्रदर्शितम् ।' इति । ततो राजा परमाश्चर्यतरङ्गितान्तरङ्गो बभूव । तस्मिन्समये भाण्डारिक आगत्य राजानमुवाच— 'भो राजन्पाण्ड्यराजेन सांवत्सरिकः करः प्रेषितः' इति । राजा 'किं प्रेषितम्?' इत्यपृच्छत् । भाण्डारिकः— देव,

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः
पञ्चाशन्मदगन्धलुब्धमधुपा धौरंधराः सिन्धुराः ।

अश्वानां त्रिशतं चतुर्दश रथाः पण्याङ्गनानां शतं
चैतद्विक्रमभूमिपाल भवतस्तत्पाण्ड्यराट्प्रेषितम् ॥ १ ॥

इति प्रत्यभाषत । ततो राजा 'तत्सर्वमैन्द्रजालिकाय प्रदीयताम्' इत्यादिदेश । भाण्डारिकोऽपि तत्सर्वमैन्द्रजालिकाय प्रादात् ।" इति । इमां कथां कथयित्वा पाञ्चालिका भोजराजमब्रवीत्—'ईदृशा औदार्यादयो गुणा यदि विद्यन्ते तदास्मिन्भद्रासने समुपविश' इति । सोऽपि तादृशान्गुणानात्मन्यपश्यन् 'नाहमिदं भद्रासनमर्हामि' इति मन्वानस्तूष्णीं ततो न्यवर्तत ॥

इति त्रिंशमुपाख्यानम् ।

अथैकत्रिंशमुपाख्यानम् ।

पुनरप्येकदा सिंहासनमारोढुमागतं भोजं पाञ्चालिका निवार्य व्याजहार—'भो महीवल्लभ विक्रमस्तत्सदृशो वा वहेदिति महेन्द्रेण दत्तादेशमिदं भद्रासनम् । अतो यदि तदीयमङ्गलगुणास्त्वयि विद्यन्ते तदा काममुपविश' इति । ततो राज्ञा 'कथय तस्य मङ्गलगुणान्' इति पृष्टा साप्येवं कथयामास—"राजनि विक्रमे महीं शासति कदाचित्कश्चिद्दिगम्बरः समागम्य,

श्रीशो ददातु भगवान्भक्तानां वः समीहितम् ।
यद्भक्तः शुकतामेति मुक्तिकन्याकरग्रहे ॥ १ ॥

इत्याशिषं प्रयुज्य फलमेकमदात् । अथ राजनिर्दिष्टमासनमध्यासीनो वाचमेवमुदञ्चयामास—'राजन्नहं मार्गशीर्षचतुर्दश्यां महाश्मशाने देवतामुद्दिश्य हवनं करिष्यामि । भवान्हि परोपकारी महासत्त्वश्च । अतो मया क्रियमाणे होमे भवता सहकारिणा भवितव्यम्' इति । ततो राजा 'मया किं कर्तव्यम्?' इत्यन्वयुङ्क्त । दिगम्बरः प्रत्यवदत्—'महाश्मशानस्यानतिदूरे शमीपादपमूले कश्चिद्वेतालः परिवर्तते । स त्वया मौनेन समानेतव्यः' इति । राजा 'ओम्' इत्यङ्गीचकार । ततः क्षपणकः कृष्णचतुर्दश्यां होमद्रव्याणि संगृह्य महाश्मशानवाटमगाहत । राजापि कृपाणपाणिर्महाश्मशानं विवेश । ततो दिगम्बरो वेतालपरिग्रहार्थं शमीमहीरुहं तस्मा अदर्शयत् ।

राजापि तं भूरुहं प्राप्य वेतालं स्कन्धे गृहीत्वा महाश्मशानं प्रत्याजगाम । मध्येमार्गं वेतालस्तं जगाद — 'भो राजन्मार्गश्रमापनयनाय कापि कथा कथ्यताम्' इति । राजा तु मौनभङ्गभयात्तूष्णीं जगाम । अनन्तरं वेतालः 'राजन्मौनभङ्गभयान्मया न जल्पसीति मन्ये । अतोऽहमेव कामपि कथां कथयामि । अवसाने च मदीयप्रश्नस्योत्तरं जानन्नपि मौनभङ्गभयाद्यदि न कथयिष्यसि तर्हि तव शिरः सहस्रधा स्फुटिष्यति' इति भणित्वा कथामिमां कथयितुमारेभे — 'राजन्दक्षिणेन हिमवन्तं विन्ध्यवती नाम काचिन्नगरी चकास्ति । तत्र सुविचारो नाम कश्चिद्राजावसत् । तस्य च जयत्सेनो नाम कश्चित्पुत्रः । स चैकदाखेटाय महदरण्यमवगाह्य तत्र हरिणमेकं दृष्ट्वा तमनुधावन्सुदूरमतिपपात । अथ कथंचिन्नगरमार्गमुपलक्ष्य मन्दं मन्दमेकाकी समागच्छन्मध्ये कामपि तरङ्गिणीमद्राक्षीत् । तस्यास्तीरे कश्चिद्ब्राह्मणः सायन्तनं कर्म समनुतिष्ठन्नासीत् । राजपुत्रस्तत्समीपं गत्वावदत् — 'भो ब्राह्मण यावदहं जलं पिबामि तावदमुमश्वं गृहाण' इति । ब्राह्मणः 'किं तव प्रेष्योऽहमश्वं ग्रहीतुम् ?' इत्यपृच्छत् । राजपुत्रस्तेन प्रश्नेन सञ्जातकोपः कशया ब्राह्मणमताडयत् । ब्राह्मणोऽपि कशाताडनव्यथामसहमानो राजसमीपं गत्वा सर्वं वृत्तान्तं निवेदयामास । ततो राजा रोषारुणलोचनः पुत्रं स्वदेशान्निर्वासयितुमयतत । तस्मिन्नवसरे तत्सचिवो राजानं व्यजिज्ञपत् — 'देव राज्यभारोद्वहनसमर्थं कुमारं किमिति देशान्निर्वासयसि । नाहमिदमुचितं मन्ये' इति । तदा राजा मन्त्रिणं प्रत्युवाच — 'सखे समुचितमेवेदमस्य मन्ये, यदयं ब्राह्मणं कशया जघान । बुद्धिमता हि पुरुषेण ब्राह्मणद्वेषो न कार्यः । उक्तं च—

न विषं भक्षयेत्प्राज्ञो न क्रीडेत्पन्नगैः सह ।
न निन्देद्योगिबृन्दं च ब्रह्मद्वेषं न कारयेत् ॥ २ ॥ इति ।

किं च, अत्युन्नतपदं प्राप्तः पूज्यान्नैवावमानयेत् ।
नहुषः शक्रतां प्राप्तश्च्युतोऽगस्त्यावमाननात् ॥ ३ ॥

अतो ब्राह्मणाः सर्वेऽपि पूजनीयाः । तथा च भगवान् —

यश्च मां परया भक्त्या ह्याराधयितुमिच्छति ।
तेन पूज्या द्विजाः सम्यक्तेन तुष्टो भवाम्यहम् ॥ ४ ॥ इति ।

एवमुक्त्वा स राजा स्वपुत्रो येन हस्तेन ब्राह्मणमताडयत्तस्य हस्तस्य छेदनेन तत्प्रतीकारं निर्णिनाय । तदा च ब्राह्मणो राजसमीपमेत्य 'भो महाराज बालिशोऽयं भवतः सुतोऽज्ञानादेवं कृतवान् । इतःपरमीदृशमनुचितं न कुर्यात् । आद्योऽयमस्यापराधो मर्षणीयः' इति विज्ञापयामास । ततो राजा तद्वचनमनुरुध्य स्वपुत्रं विससर्ज । ब्राह्मणोऽपि यथागतमगात् " इति । इत्थं कथां कथयित्वा वेतालो राजानमपृच्छत् — 'अनयोर्ब्राह्मणभूपालयोः कतरो गुणाधिकः ?' इति । राजा 'भूपाल एव गुणाधिकः' इति प्रत्यब्रवीत् । तच्छ्रुत्वा वेतालो मौनभङ्गो जात इति निवृत्य शमीतरुं जगाम । राजापि पुनस्तत्र गत्वा तं स्कन्धे समारोप्य यावदाजगाम तावद्वेतालः पुनरप्येकां कथां कथयामास । अवसाने च राज्ञा मौनभङ्गः कृतः । वेतालोऽपि निवृत्य शमीतरुमाससाद । पुनस्तत्र गत्वा राजा तं स्कन्धे समारोप्य यावदाजगाम तावद्वेतालः कथामन्यां कथयति स्म । इत्थं सुमनोहराः पञ्चविंशतिं कथाः कथयित्वा वेतालो विक्रमस्य बुद्धिकौशलं कथाग्रहणवैदग्ध्यं कृपारसौदार्यादीन्गुणांश्च निरीक्ष्य परं सन्तुष्टो विक्रममवादीत् — "भो राजन्नयं दिगम्बरस्त्वां हन्तुं प्रयतते । यदा त्वं मां तत्र नेष्यसि तदा स त्वामेवं वदिष्यति — 'राजन्नतिश्रान्तोऽसि । तदिममग्निकुण्डं प्रदक्षिणीकृत्य दण्डवत्प्रणम्य निजस्थानं गच्छ' इति । ततः प्रणामाय नम्रं भवन्तं प्रहृत्य तावकेन मांसेन होमं कृत्वा पूर्णाहुतिं च विधाय तत्र होमे मां ब्रह्माणं कृत्वान्ते स्वानुष्ठितं कर्म ब्रह्मार्पणं करिष्यति । एवं क्रियमाणेऽस्य दिगम्बरस्याणिमादयोऽष्ट सिद्धयो भविष्यन्ति । अतो यदा स दिगम्बरो नमस्कर्तुं त्वामादिशति तदा त्वम् 'अहं सार्वभौमः । सर्वे राजानो मां प्रणमन्ति मया तु न कदापि प्रणामः कृतः । अतोऽहं प्रणन्तुं न जाने । प्रथमं त्वमेव प्रणाममनुष्ठाय दर्शय' इति ब्रूहि । ततः स यदा प्रणामाय नम्रो भविष्यति तदा त्वं तस्य शिरश्छिन्द्धि । अहं तव ब्रह्मा भूत्वा हवनं पूरयिष्यामि ।

तेन च तवाष्ट महासिद्धयो वशंवदा भविष्यन्ति" । इति । एवं वेतालेन बोधितो विक्रमस्तथैव कृतवान् । ततो वेतालः स्वयं हवनं निर्वर्त्य दिगम्बरस्य शिरः पूर्णाहुतिं कृत्वा सर्वं ब्रह्मार्पणं विधायाणिमादीरष्ट महासिद्धी राजसात्कृत्वा जगाद— 'विक्रममहीपाल तवाहं प्रसन्नोऽस्मि वरं वृणीष्व' इति । राजापि 'यदि मम प्रसन्नो जातोऽसि तर्हीमं दिगम्बरं समुद्धर । यदा चाहं त्वां स्मरिष्यामि तदा त्वं संनिधातुमर्हसि' इति प्रार्थयत । वेतालोऽपि तथेति प्रतिज्ञाय दिगम्बरं समुद्धृत्य निजनिवेशं विवेश । विक्रमोऽपि तस्मै दिगम्बराय ता अष्ट महासिद्धीर्दत्त्वा स्वनगरं विवेश" । इति सालभञ्जिकाकथितां कथां श्रुत्वा भोजस्तामाह— 'सत्यमाह भवती । नाहं विक्रमसार्वभौमस्य शततमीमपि कलामर्हामि । वृथैवायमुद्यमो मया बहुवारमकारि' इति । एवमुक्त्वा म्लानवदनो निजजन्म गर्हयन्यथागतं निववृते ॥

इत्येकत्रिंशमुपाख्यानम् ।

———(*)———

अथ द्वात्रिंशमुपाख्यानम् ।

भूयोऽपि भोजभूपाले ज्ञात्वापि विक्रममहिमानं तदीयसिंहासनमारोढुं समागते कापि पाञ्चालिका निवार्य जगाद— हन्त, कथमियं ते दुराशा । निवृत्तकामो गतोऽपि पुनरागतोऽसि । अद्यापि समाकर्णय तदीयदिव्यगुणान्— तस्य विक्रमस्य सदृशं कमपि भूमण्डले न पश्यामि । यः कान्तमयखड्गेन सर्वान्नृपतीन्विजित्य निःसपत्नं राज्यं कृतवान् । यः परेषां शकं निराकृत्यात्मशकं प्रवर्तयामास । यः समस्तान्दुर्जनान्निगृहीतवान्, याचकलोकदुर्गतिं च परिहृतवान् । अवग्रहादिकं च निरसितवान् । एतादृशस्यापरिमेयमहिमसमलंकृतस्य विक्रमसार्वभौमस्य सदृशः पुरुषः कोऽपि नास्त्येवेति ममाभिप्रायः । यदि त्वं तादृशगुणमात्मानं जानासि तर्हि काममस्मिन्भद्रासने समुपविश' इति । तच्छ्रुत्वा राजावनतमुखस्तूष्णीमवलस्थे ॥

इति द्वात्रिंशमुपाख्यानम् ।

———(*)———

अत्रान्तरे काचन पुत्रिका त्रपाभराच्चित्रार्पितमिव स्थितं भोजमवादीत् — ' भो भोजभूप भवानपि विक्रमार्कप्रतीकाश इत्येवं मन्ये । अतो युवां द्वावपि नरनारायणात्मधारिणौ । इदानीं त्वत्तः परः पवित्रचरित्रः सकलकलाप्रवीणः शौर्यौदार्यादिसुगुणभूषणो राजा कोऽपि नास्ति । अधुना तव प्रसादादस्माकं द्वात्रिंशतः पुत्रिकाणां पापपरिहारो जातः । शापाच्च विमुक्ताः स्मः ' इति । अनन्तरं भोजः ' कथं वः शापो जातः ? ' इति पुत्रिकामपृच्छत् । साप्येवं कथयामास — ' राजन्वयं द्वात्रिंशत्सुराङ्गनाः पार्वत्याः सख्यः । तस्याः परमप्रेमास्पदभूताः । अस्माकं प्रत्येकं नामधेयानि श्रूयन्ताम् — सुकेशी, प्रभावती, सुप्रभा, इन्द्रसेना, अनङ्गजया, इन्दुमती, कुरङ्गनयना, लावण्यवती, कामकारिका, चन्द्रिका, विद्याधरी, प्रबोधवती, निरुपमा, हरिमध्या, मदनसुन्दरी, विलासरसिका, मन्मथजीवनी, रतिलीला, मदनवती, चित्ररेखा, सुरतगह्वरा, प्रियदर्शनी, कामोन्मादिनी, चन्द्ररेखा, हंसप्रबोधा, कामशरोन्मादिनी, सुखसागरा, मदनमोहिनी, चन्द्रमुखी, लावण्यलहरी, मरालगमना, जगन्मोहिनी, इति । वयमेकदा कुत्रापि रजताचलशिलातले समुपविष्टाः किमपि किमपि संलपन्त्यः सुखमास्म । तदा परमेश्वरः सानन्दोऽस्मास्वनुरागरमणीयां दृष्टिं न्यवेशयत् । अत्रान्तरे तं दृष्ट्वा देवी पार्वती सकोपास्मानेवमशपत् — ' भोः सख्यः, भवत्यो निर्जीवाः पुत्रिका भूत्वा वासवसिंहासने तिष्ठन्तु ' इति । ततोऽस्माभिः प्रणिपत्य शापावसानं याचिता देवी कृपारसार्द्रान्तःकरणास्मानेवमवदत् — ' कलियुगे विक्रमादित्यस्तत्सिंहासनं वासवलोकाद्भूलोकं नीत्वा तत्रोपविष्टो बहूनि वर्षाणि राज्यं पालयिष्यति । तस्मिंश्च परलोकं गते तत्सचिवास्तत्सिंहासनं कुत्रापि पवित्रे क्षेत्रे निवेशयिष्यन्ति । ततः कतिपयैर्दिवसैस्तद्भोजराजहस्तगतं भविष्यति । भोजोऽपि तन्नगरं नीत्वा प्रति-

ष्ठाप्य तदारोढुं समागमिष्यति । तदा च विक्रमस्य चरित्रं तस्मै कथयित्वा शापाद्विमुक्ता भविष्यथ' इति । अतो बहोः कालाद्भवन्तं प्रतीक्षमाणानामस्माकमद्य भवदनुग्रहेण शापाद्विमोचनमासीत् । इदानीं त्वयि वयं प्रसन्नाः स्मः । वरं वृणीष्व' इति । अनन्तरं भोजः 'मम किं नामापेक्षणीयम् ? । संपूर्णकामोऽस्मि । तथापि परोपकारार्थमिदं मया प्रार्थ्यते — 'ये मर्त्या एतच्चरित्रं शृण्वन्ति लिखन्ति वा तेषां प्रौढप्रतापकीर्तिधैर्यौदार्यादिगुणाः प्रवर्धन्ताम् । एतच्चरित्रमाकल्पमविच्छिन्नं महीमण्डले वर्तताम् । श्रोतॄणां भूतप्रेतपिशाचडाकिनीशाकिनीमारिकायक्षराक्षसादिभ्यो भयं मनागपि मा भूत् । व्याघ्रभल्लूकप्रमुखशरारुनिकरादपि भीतिर्मा जायताम्' इति । एवं प्रार्थिताः सालभञ्जिकाः 'यथाभिलषितमस्तु' इति राज्ञे वरं दत्त्वा सर्वा अपि परिगृहीतसुरसुन्दरीविग्रहा दिवमुत्पेतुः । ततो भोजराजस्तत्सिंहासनं नवरत्नखचिते हाटकमये विचित्रे प्रासादस्य शिखरे संस्थाप्य तदुपरि परमेश्वरं निधाय देवं सिंहासनं च प्रतिदिनमर्चयन्सुखेन महीं सुचिरं शशास ॥

श्रीमतो विक्रमार्कस्य चरित्रं महिमोत्तरम् ।
द्वात्रिंशत्प्रतिमाप्रोक्तं समाप्तिमगमत्तराम् ॥

——(*)——

शुभमस्तु ।